॥ श्रीश्रीगौरहरिर्जयति ॥

गौडीयग्रन्थगौरव:—

प्रकाशितग्रंथसंख्या—११२—११३

# स्वकीयात्वनिराशाविचार:

तथा

# परकीयात्वनिरूपणम्

रचयिता—

श्रीश्रीविश्वनाथचक्रवर्त्तीजी


(सं)वत्—२०२०

(मूल्)यम्—· २५ नये पैसे

प्रकाशक: व मुद्रक:—

कृष्णदासबाबा

गौरहरिप्रेस, कुसुमसरोवर

# ❀ स्वकीयात्वनिराशविचारः ❀

श्रीकृष्णाय नमः ।

इह व्रजे केचन श्रीमन्नन्दनन्दनेन सह वृषभानुनन्दिन्या उद्वाहं वदन्तो विवदन्ते । तत्र त एवं प्रष्टव्याः, किं मथुराप्रस्थानात्पूर्वमेव ? उत मथुरातो द्वारकायामुषित्वा ततः कुरुक्षेत्रमिलनसमये ? आहोस्वित् तत आगत्य दन्तवक्रवधानन्तरं पद्मपुराणीयगद्यानुसारेण पुनर्व्रजागमनोत्तरकाले ? किमुत लक्ष्मीपरमव्योमनाथवन्नित्यसिद्ध एवेति, तत्रापि किं पितृभ्यां श्रीकृष्णाय प्रथमत एवानन्यपर्वेव दत्ता ? उताहो आदौ अन्यस्मै दत्ता तदनन्तरं यथा कथञ्चित्तद्विवाहस्य मिथ्यात्वेन विख्यापनं श्रुत्वा पुनरनेनोद्वाहिता ?

नाद्यः व्रजराजस्य वैश्यजातित्वादुपनीतस्यैव श्रीकृष्णस्य तदौचित्यात्, प्रकृते तु मथुरायामेव कंसवधानन्तरमेव श्रीमद्वसुदेवेनैव तस्य संस्कृतत्वात् । न चादौ व्रजे संस्कृतचर एव पुनः क्षत्रियत्वे संस्कृत इति वाच्यम्, श्रीभागवतादिषु कुत्रापि तथानुल्लेखात् न्यायसिद्धत्वाच्च । तद्यथा-"गर्भाधानादष्टमे जन्मतो वा मौञ्जीबन्धः शस्यते ब्राह्मणानाम् । राजन्यानां नवमेऽकादशेऽब्दे वैश्यानां च द्वादशे वेदविद्भिरिति' स्मृतेः । प्रस्तुते श्रीकृष्णस्यैकादशवर्षारम्भमात्रं व्रजे स्थितिः सुप्रसिद्धा ।

नापि द्वितीयः कुरुक्षेत्रान्मिलनान्तरं सर्वेषां व्रजवासिनां च यथा पूर्वं सकुटुम्बानामेव स्व स्व स्थानगमनात् विशेषतस्तासां रहो मिलनसमये-"आहुश्च ते नलिननाभ" इत्यस्य तद्वचनस्य व्याख्याने श्रीकृष्णसन्दर्भे गोपीवाक्ये गोपियोः "ननु त्वयनेनागत्य मां कुतो नानु-

भवतस्तत्राहुः गेहं जुषां परगृहिणीनामस्वतन्त्राणां'' इति व्याख्यातत्वात्तत्प्रसंगस्यापि कर्त्तुमयोग्यत्वात् । तृतीयस्तु दुर्घट एव। पाद्मोत्तरखण्डे श्रीकृष्णागमनानंतरं "गोपनारीभिरनिशं क्रीडयामास केशव' इत्यत्र गोपपत्नीभिरित्युक्तत्वात् "बहु प्रेमरसेनात्र मासद्वयमुवासहे'' त्युक्त्वा समनंतरं तस्मिन्नेव गद्ये पुत्रदारसहितानां व्रजवासिनां श्रीकृष्णेनान्तर्द्धापितत्वस्योक्तत्वाच्च । प्रमाणान्तरस्य तु कुत्राप्यदृष्टत्वात् । न चानिशक्रीडा दाम्पत्यं बिना न सिद्ध्यतीत्यन्यथानुपपत्त्या तदवश्यमङ्गीकर्त्तव्यमिति वाच्यं । तस्य हाटकेश्वरस्येवाविरतसुरतस्यामतत्वाद्रसापहत्वाच्च । ननु कृष्णसन्दर्भगोपालचम्पू-लोचनरोचन्यादिषु दन्तवक्रवधात् पूर्वलीलानामवतारलीलात्वेनोक्त्वा प्रत्याख्यानात् एतदनन्तरलीलानामेव नित्यता स्थापितैव । सर्वासां व्रजसुन्दरीणां सत्यत्वमिथ्यात्वे तत्र निर्णीय मायिकीनां स्वस्वपतिगृहगृहिणीत्वे स्थितित्वविवरणात् सत्ताभिः सह श्रीकृष्णस्य पुनरुद्वाहस्याप्युक्तत्वात् केन वा को नाम नवीनः सन्देहः समुत्थापित इति सन्दिहानाः स्मः वयमेव । अत्रोच्यते । श्रीकृष्णलीलानां श्रुति-स्मृति-पुराणागमादिषु नित्यत्वेन प्रतिज्ञातानां सर्व्वपूर्वाचार्य्यजीवातुरूपोपासनीयत्वेन सम्मतानां यदनादरं विधाय स्वरचितलीलानामेव नित्यतां ब्रूथ । तत्र श्रीभगवत्सन्दर्भादिरेव युष्मन्निरसने जागरूको वर्त्तत एवालं तद्विचार विस्तारणात्र सिद्धान्तसारे तु विवृतमेव । भागवतामृतधृतगद्यानुसारिणश्च ब्रुवन्तस्तर्हि तल्लिखनमुपक्रमोपसंहाराभ्यां विचार्य्य । अनार्य्यं कथं वदथ! तत्र तेन दन्तवक्रं निहत्य यमुनामुत्तीर्य्य श्रीमन्नंदादिगोपगणैः सह मिलित्वा गोपनारीभिर्मासद्वयं विहृत्य पुत्रदारसहिताः सर्वे एव व्रजवासिनोऽन्तर्द्धापिता एतावन्मात्रं निर्णीतं नान्यदधिकं किञ्चिदपि । किञ्च यद्यपि स्वस्वपत्न्यादिभिः सह व्रजवासिनामप्रकटे वास पुराणानुयायी तेषां ग्रन्थकर्त्तृणां निर्णयः कथमन्यैरन्यथा वक्तुं शक्यं । उच्यते चेत् केन वा तत्प्र-

माणीकरणीयं अपि च यद्युद्वाह एव दृष्टस्तदान्यैरुपात्तोऽपि पूर्वोद्वाहस्य मायिकत्वख्यापनानन्तरं श्रीकृष्णेन सह पुन र्विवाहः शिष्टैः कथं मन्तव्यः लोके वेदे च तस्य दिधिषुवादस्यातीव जुगुप्सितत्वममूलकत्वं च स्पष्टमेव । नापि चतुर्थः संगच्छते—

प्रकटाप्रकटयोरैक्यरूपेण लोकवल्लीलाकैवल्येन च सर्वदा स्थितेः सर्वत्र निर्णयात । ननु ब्रह्मसंहितोक्तश्रीकृष्णस्यादिपुरुषत्वं तासां च लक्ष्मीत्वमतिविस्पष्टमेव । तदनुयायिनां गोलोकोपासकानामस्माकं किमेताभिरवतारलीलाविभीषिकाभिः । न चाप्रकटलीलां विना माधुर्यास्वाद एव न संभवेदिति वाच्यं । अप्रकटस्य सर्वेषां नयनागोचरस्य गोलकत्वे एव स्थापितत्वात । अत्र वदामः । यद्यपि रमादिशब्दैस्तासां आदिपुरुषत्वेन च श्रीकृष्णस्य च विख्यातस्तथापि ब्रह्मणोक्तमंत्रचिन्तामणेरुपासनाप्रकारे तु श्रीमन्नन्दनन्दनत्वे तासां च गोपीत्वे पञ्चरात्र-गौतमीय-क्रमदीपिकादिषु च निश्चितत्वातथा वक्तुमशक्यमेव । नच व्यासोक्तलीलाभि र्विना पंचरात्रादिषु कोऽपि मन्त्र उक्तोऽस्ति । पूतनास्तनपातारमित्यारभ्य तत्र लीलाविशिष्टस्यैव श्रीकृष्णस्य सर्वत्रोपास्यत्वेन निर्दिष्टत्वात । लोकवल्लीलाकैवल्यस्यैव समीहितत्वं सर्वत्र तद्भिन्नोपासना नास्त्येव चेत्तथापि प्रौढि ब्रह्म इव कश्चन निर्लील उपास्यतां नाम न तत्र विवादः । निर्विशेषे स्वीकृते उपासनाया असिद्धिः सर्वत्राचार्यैर्निर्णीतैव । किंच प्रथमनिष्पन्नो विवाहः सर्वस्मिन्नेव व्रजे विख्यातः विदग्धमाधवादावुक्तः कथं सोऽन्यथा कर्तुं शक्यः । न च शारीरकादौ सर्वं प्रपञ्चजातस्य मिथ्यात्वं प्रतिपाद्यत एव तद्वदस्यापि मिथ्याभूताभि र्गोपीभिर्गोपैः करग्रहणस्य मिथ्यात्वं निजग्रन्थेषु निर्णीतमिति वाच्यम । शारीरकमतानुसारिभिस्तथात्वे निश्चयं रटद्भिरपि निष्पन्नो व्यवहारो ब्राह्मणादीनां यथा प्रवृत्तमन्यथा कर्तुमशक्यत्वात् चेत्तैरेव सिद्धः प्राकृतो व्यवहारो भ्रमत्वेनोद्घुष्यमाणोऽपि असिद्धः कर्तुमशक्यः प्रकृते गोपसुन्दरी-

सम्बन्धित्वोलालोरन्यै र्मिथ्यत्वे निश्चीयैकस्मिन्नेव ग्रामे प्रथमानंतर-द्वितीयोद्वाह: कथं निर्वाहणीय: तथापि यदि कथंचित्तद्वक्तव्यमेवेति निर्बंध एव यौष्माक: तर्हि प्रथमोद्वाहवादिभ्य: प्राचीनेभ्यो जार-वादित्वे गालिप्रदाय स्वयं द्विर्विवाहं वदन् दिधिषुवादित्वमपि स्वस्योरीकरणीयमवश्यमेवेत्यलं विचारविलसितेनेति । "पुनर्भू-र्दिधिषू रूढ़ा द्विस्तस्या दिधिषु: पतिरि"त्यमर: । किञ्च यदि कृष्ण-प्रेयसीनां मायिकत्व-सत्यत्वाभ्यां सर्वथा अभिन्नाकाराच्च सर्वदा स्वरूपद्वय स्वीकार: तदा व्रजे यावन्तो व्रजवासिनस्तेषां श्रीवृष-भानुकीर्त्तिदाप्रभृतीनां तासां पितृणामप्यन्यथानुपपत्त्या स्वरूपद्वयं स्वीकर्त्तव्यमेव । नो चेत् कृष्णसन्दर्भ-गोपालचम्पूक्त: सिद्धान्तो व्याकुप्येत । तत्र तु "मन्निर्वर्त्तिता: ता: स्व स्व पितृगृहमनुवर्त्ततां । कृष्णैक परायणास्तु स्व स्व पितृगृहं" इति देव्या वचनेन समाहित-त्वात् । यदि च नाम-रूपादिनैक्येन ता युगपदेव पतिगृह-पितृ-गृहादिषु प्रहितास्तर्हि सुतरां स्वस्वपतिगृहगृहिणीनां भार्या: पुत्र-प्रयोजना इति न्यायेन गृहादिसौष्ठवपोषाय च अपत्योत्पत्तिरव श्यं भाविनी । तस्यां वसत्यां जातकर्मारभ्य सर्वक्रियाकलापमुभय कुलवृद्धादिं बिना नैव निष्पद्यते इति तेऽपि स्वयमेव स्वीकृता एव । एवं च या: स्व स्व पितृगृहं गतवत्यस्ताभि- सह श्रीकृष्णस्य विवाहोत्सवो भावीति भवदाशय: । तत्र तस्य विवाहोत्सवे सर्व एव व्रजवासिजना:श्रीमद्व्रजराजेनावश्यमेव निमन्त्रणीया: तथा सति तत्पर्वणि स्त्रीप्रधानत्वात् जटिलाभारुण्डाद्या:पुरंध्रय:स्व-स्ववधूभी राधाचंद्रावल्यादिभि: सहावश्यमामंत्र्य एव अत्रैवं संदेह: प्रस्तुते तस्मिन्नुत्सवे स्वस्वपार्श्ववर्त्तिन्यो राधाद्या: कृष्णेनो-द्वाह्यमाना अपि ता स्तास्ताभि: श्वश्र्वादिभि: पुनर्निमन्त्रितै रभिमन्यु-प्रभृतिभि: श्रीवृषभानुवादिभि स्तासां पितृभिस्ताभिश्च दृश्यन्ते न वा । दृश्यन्ते चेत् कीदृशो बोध: समग्राणां किं एता मद्वधूवर्गेभ्यो मद्दारेभ्योऽस्मद्बालिकाभ्योऽस्मभ्यं पृथगेव इति निश्चयात्मक: उत

परिचेतुमशक्यतया सन्देहरूपः आहोस्वित् योगमायाबलेनैवाननु-संधानावयवः । नाद्यः तथा सति यद्यपि वयं सत्या एता मायिक्य इति पितृगृहगतवतीनां भवदभिमतः तथापि प्राचीन-संस्कार-बलात् पतिभ्योऽभिमन्वादिभ्यः संकोच संपत्त्या पुन विवाहस्याऽ-नभिमतत्वात् । पतिगृहस्थितानां तु तथाबोधाभावात स्वसमाना-काररूपगुणादिमतीनां दर्शनेन विचिकित्सापत्त्या महाजुगुप्सा । एवं श्वश्वादिभिः पतिभिः पितृभिश्च युगपद्दर्शनेन जुगुप्सै-वमस्य तेन तु प्रकृतविवाहकर्मणि प्रवर्त्यते इति विसष्टुलत्वाच्च न च एता मदीयाभ्योऽभिन्ना इत्याकारक एव बोध इति प्रौढीरास्मा-कीति भ्रमादपि वाच्यः ।

तासां नाम-रूप-गुणादीनां सर्वथा अभेदेनैव प्रतीयमानात् । नापि द्वितीयः द्वयोरपि नामादिभिरीषदप्यनन्यतया श्वश्रूप्रभृतीनां स्वय-मेव स्वेषां वा अपरिचय इति वक्तुमप्ययोग्यत्वात् । नापि तृतीयः तस्याः प्रकृतलीलासंपादिकात्वप्रसिद्धेः । प्रकृतं तु वरकन्ययो दर्श-नपूर्वकवित्रीष्टज्ञानात्तत्सन्मंगलसंपादनानन्तरं आप्तवर्गैस्ताभ्यां यौतु-कादिसमर्पणं न त्वन्यत । सर्वथा तु मिथः संदर्शनमेव लोक-वेदरीत्यासु निष्पन्नं । तस्मिंश्च सति श्रीकृष्णस्यैतेषां दर्शनेन लज्जा-भयोत्पत्तिः । तथा तेन सहोद्वाहे प्रवर्त्तितानां गोपीनां श्वश्रू-पत्यादिदृष्ट्या भयादिना प्रकृते पुनर्विवाहेऽननुमतिः । गोवर्द्धना-भिमन्युप्रभृतिनां इन्द्रजालसदृश तद्दर्शनात् श्रीकृष्णेन सह विरोधो-द्भवः पित्राद्या वृषभाण्वादयस्तु मदौरस्यो भवन्त्येता एता न भव-न्तीति वा कथं वा प्रतियन्तु कथं वा पुनः पूर्वजामातृणां समक्षमेव निरपेक्षतया ताः संप्रददतु, न च सर्वं समाधात्री पौर्णमासीति विवृतमेवेति वाच्यं । श्रीशंकराचार्याद्याः सहस्रशः प्रपञ्चस्य मिथ्या-त्वं व्याख्याय श्रुतिरपि तदुपोद्बलकत्वेन दर्शयित्वापि ब्राह्मणादि-कर्त्तृकविवाहादिकर्मणां मिथ्यात्वं लोके दृढीकृत्य तेषां स्त्र्यादियेभ्यः केभ्य एव दाययितुं न समर्था बभूवु रिति पूर्वमेवोक्तत्वात् । अत्र तु

कृष्णकर्तृकचरित्राणां लीलात्वेन प्रसिद्धानां दिव्यत्व-नित्यत्वयोः प्रतिष्ठितानां न जाने मायिकत्वकल्पनया किं साधनीयं वादिभिरित्यलमनुलापेनेति। अपि च श्रीमद्वेदव्यास एकस्यैव ऋग्वेदस्य चतुर्द्धा विभागं विधाय यथाधिकारिशाखाः सहस्रं विभज्यापि स्त्रीशूद्रादीनां तत्रानधिकारात् कथं निस्तारः स्यादिति भारतमप्युपदिश्य मोक्षाधिकारिणां तन्सिद्धयर्थं ब्रह्ममीमांसामप्यध्यायचतुष्टयेन प्रदर्श्य पुनरपि द्वंद्वधर्मेस्वभिरतान् जनान् वीक्ष्य तदुपकारार्थं यथाधिकारि विचार्य्यैर्यैर्यैव वर्णनीयं तत्वानाय्यैंचर्यैति पुराणानि प्रकाशितानि। तथापि चित्तस्याप्रसाद एव समुपसीदति स्मनतु तत्प्रसादः यदैव श्रीमन्नारदोपदेशात् श्रीमद्भागवतं वर्णितवान तदैव सर्वतो भावेन मनः प्रसत्तिमुपलभ्य भगवत्स्वरूपमप्युपलेभे। अतएवार्वाचीनैर्भव्यबुभूषुभिस्तच्चित्ताप्रसादप्रसादाभ्यां अन्वय-व्यतिरेकाभ्यां निश्चित्य शास्त्रान्तरेषु तत्सम्मतेष्वेव मनोऽभिनिवेशनीयमिति प्रमाणचूडामणित्वेन श्रीमद्भागवतमेव सतां सम्मतं तत्रापि श्रीकृष्णलीलाप्रधानत्वेन दशमस्कंध एव तद्धृदयं। तत्रापि तनू प्राण इव सर्वलीलातोऽपि मुख्यतमरासलीला वर्णन पंच अध्यायाः अतस्तत्सर्वस्वरूपस्त एव विचारणीयाः। तत्र शुश्रूषन्त्यः पतीन् काश्चिदश्नन्त्योपास्येत्यादि। तमेव परमात्मानं जारबुद्धयापि संगतेत्यादि श्रीशुकवाक्यं।

मातरः पितरः पुत्रा इत्यो, तद्यात मा चिरं घोषं शुश्रूषध्वं पतीन् सतीरित्या, भर्त्तुः शुश्रूषणं स्त्रीणां परोधर्मो ह्यमाययेत्या, पतिः स्त्रीभिर्न हातव्यो लोकेप्सुभिरित्या, जुगुप्सितं च सर्वत्र ह्यौपपत्यं कुलस्त्रिया इति कृष्णवाक्यानि। यत्पत्यपत्य सुहृदामनुवृत्तिरित्या, कुर्व्वनि हि त्वयि रतिं कुशलाः स्व आत्मन्नित्य - प्रिये पतिसुतादिभिरार्त्तिदैः किमित्यादि। कास्त्र्यंग ते कलपदामृतवेणुगीत-संमोहितार्य-चरितान्न चले त्रिलोक्यामित्यादि तासां वचनानि च प्रथमेऽध्याये। पतिसुतान्वयभ्रातृबान्धवानति विल-

ङ्क्य तें त्यच्युतागता इत्यादि च तृतीयेऽध्याये । एवं मदर्थोज्झितलोकवेद स्वानां हि वो मय्यनुवृत्तयेऽबला इत्या । न पारयेऽहं निरवद्यसंयुजां स्वसाधुकृत्यं विविधायुषापि च । या मा भजन् दुर्जरगेहशृंखलाः संवृश्च्य तद्व इत्यादि श्रीकृष्णवाक्यानि चतुर्थे अध्याये । कृत्वा तावन्तमात्मानं यावती गोपयोषितः । रराम भगवांस्ताभिरित्यादि श्रीशुकवाक्यं । स कथं धर्मसेतूनां वक्ता कर्त्ताभिरक्षिता । प्रतीपमाचरद् ब्रह्मन् परदाराभिमर्शनम् । आप्तकामो यदुपतिः कृतवान् वै जुगुप्सितं । किमभिप्रायं एते नः संशयं छिन्धि सुव्रत इत्यादि श्रीराजर्षि प्रश्ने । धर्मव्यतिक्रमो दृष्ट ईश्वराणां च साहसं । तेजीयसां न दोषाय वन्हेः सर्वभुजो यथा । गोपीनां तत्पतीनां च सर्वेषामेव देहिनां । योऽन्तश्चरतीत्यादि । मन्यमानाःस्वपार्श्वस्थान् स्वान् स्वान् दारान् व्रजौकस इति श्रीशुकवाक्यानि च पंचमेऽध्याये ।

अतोऽत्रैवं विचार्य्यते । यद्वर्णनान्तरमेव श्रीमद्वेदव्यासस्य चित्तप्रसत्तिरजनिष्ट तन्मध्यवर्तिन हृदयांतः पञ्चप्राणा इव या पंचाध्यायी तत्र तादृश—महाराजर्षि—श्रीमत्परीक्षित् प्रश्नानुरूपं श्रीमन्मुनींद्रेण भ्रमवत् स्वरूपानुभविना सर्वज्ञेन राजसंदेहनिरसनपूर्वकेन भगवतस्तेजीयस्त्वान्नदोष इत्युक्त्वाऽनीश्वरान्प्रति यथा रुद्रोऽब्धिजं विषमिति दृष्टांतेन भयं प्रदर्श्य पुनरपि निरहंकारिमात्राणां कुशलाकुशलाचरणाभ्यामप्यर्थानर्थौ नस्तः किमुत सर्वजीवनिकायानामीशितु स्तयोरन्वयः सम्बन्धोऽपीत्यभिधाय, यत्पादपंकजपरागस्य नितरां सेवया तृप्ता भक्तियोगप्रभावेनैव खण्डिताखिलबन्धा जीवन्मुक्ताः स्वछन्दाचारिणो नैव नह्यमानास्तदाचरणैर्न बध्यमाना भवन्ति तस्य स्वेच्छया प्रकटीकृततादृश लीलामयवपुषो बन्धाशंकापि कुत इत्युक्त्वा गोपीनां तत्पतीनां च सर्वेषामपि देहिनामंतर्यामितया प्रवर्त्तकरूपेण स्थित एवा प्रकटप्रकाशे गोकुलयुवराजतया तेषां पालकः सन् यो विहरति अधु–

नापि तथा कुर्वन्नेवास्ते स एव एष कृपया प्रकटो भूत्वा त्राननुगृह्यताद्दृशोः क्रीणः करोति तथैव विराजते। या लीला : श्रुत्वाऽवश्यमेव सर्व एव तदेकोपासको भवेदेवेति विहितः। तदन्यत्वेन कैश्चित्कल्पनान्तरमापाद्य विपाद्यन्ते यदयविद्या पदपतितास्ते निषिद्धाचारपरा इत्यप्यनेनैव सूचित : सर्वा ते नु तासामभिसारादौ पत्यादीनां योगमायया समाधनं व्याहृत्य यद्यपि ताःश्रीकृष्णं विहाय निजगृहमनाजिगमिषवस्तथापि ते नानुमोदिताः पुनरनया रीत्यैव मिलनस्यश्वासं प्रापिताः सत्य : रात्र्यंते केवलं लोकभीत्यैव स्व स्व वासं शय्यानिलयं गतवत्य : एतावानेव सिद्धांतित : अभ्यासेनैष एव दृढीकृत : नतु मतान्तरस्य लेशोऽप्युद्भावितः चेदितोप्यन्यथा किंचिदभविष्यत् सर्वज्ञेन तेन कुतो नोत्थापयिष्यत नच मतान्तरस्यात्यन्तगोप्यत्वात्तत्प्रकाशितवान् शुक इति स्वप्नेऽपि प्रलपनीयं महासभायां सर्वत्र विहितव्याहारस्यैव शास्त्रे लोकव्यवहारसिद्धत्वात्। न स्वविहितस्य प्रकृते तु पौनः पुन्येनैतस्यैव तेन विहितत्वात्। अतस्तादृशराजर्षिमहासदसि निषीदता ब्रह्मर्षिदेवर्षिप्रभृतीनां श्रीमन्नारदपशुरामवेदव्यासाद्यवताराणां च समक्षं द्वयोः प्रश्नोत्तराभ्यां य एव निष्कर्षः परमोत्कर्षमवाप स एव सर्वार्वाचीनजीवानां जीवातुरिति विदुषां परामर्शः। तदन्यथा कल्पनायां श्रीमन्मुनीन्द्रस्य ब्रह्मरातस्यासर्वज्ञता। श्रीकृष्णस्य पापहारित्वेऽपि पापकारिता विदग्धमाधवादि प्रकाशकानामप्यविदग्धता इत्याद्या बहव एव दोषा आपतन्तीत्यलं तत्संलापेनेति संक्षेपः। किंचो ह स्यामुज्वलोपासनायां केचनार्वाचीनाः प्राचीनानां श्रीशुकदेववेदव्यास-पराशरादीनां विदग्धमाधवादिप्रकाशकानां च मतं विमतत्वेन मन्यमानाः केवलं स्वकल्पितास्वायिकायां स्वकीयाख्यानं विख्याप्य निक्षिप्तानि सन्देह महोदधौ हृदयान्यपरिपक्कहृदयानां अतोऽत्रैवं विचार्य्यंते। तत् किं तदाख्यातुः स्वाभिमतं उतान्यदीयहार्द तत्सौ हार्द।

# ❀ अथ परकीयात्वनिरूपणम् ❀

श्रीराधाकृष्णाभ्यां नमः

श्रीकृष्णलीलापाथोधिनिमज्जितमनो-द्विपान् ।
वन्दे तद्विपरीतांस्तु नैव विंदतु मे मनः ॥१॥
श्रीमज्जीवपदद्वन्द्वं वन्दे यैराशयो निजः ।
लघुत्वमत्रेत्येतस्य व्याख्यान्ते ख्यापितः खलु ॥२॥

स यथा—स्वेच्छया लिखितं किञ्चित् किञ्चिदत्र परेच्छया ।
"यत्पूर्वापरसंबद्धं तत्पूर्वमपरं परं" इति ॥
रागेणैवार्पितात्मान इत्यत्र व्याख्यया तथा ।
पत्नीभावाभिमानात्मेत्यत्रापि च तथा तया ॥
महाभावस्य सद्भावाभावयोर्हेतुयुक्तितः ।
निश्चित्य लक्षणे तस्य विवृत्याभ्यासतो मुहुः ।
रसस्य तु परीपाकः परमक्रमलीलया ।
भवेद्व्यासशुकादीनामत्रैवावेशदर्शनात् ॥
विदग्धमाधवादीनां कर्त्तॄणां चात्र निर्भरम् ।
वर्णने चित्तसंरम्भात्तथाद्योपान्तमेव हि ॥
अस्या निर्वहणादेवेत्युज्वलस्य विवेचनम् ।
समृद्धिमत आख्याने सप्त पत्रीलिपेः परम् ॥
स्वांतस्य सर्वसंरम्भः सर्वांते दर्शितो यतः ।
अतः परेच्छालिखने विचारः क्रियते मया ॥
येन पूर्वापरालोके लोक्यते तद्विगीतता ।

अथ सोऽयं ग्रन्थकृन्महाकारुणिको रसिकमण्डलाखंडलः श्रीकृष्णचैतन्यस्वयं भगवता हृदि प्रवर्त्तनापरवशतया स्वसुहृद्वर्ग-

हृदयानन्दनाय विशेषतोऽर्वाचीनजगज्जनानामनायासेनैव वाङ्मनसयोः कृतार्थीभावभावनया च पूर्वस्मिन् ग्रन्थे संक्षेपतो वर्णितमपि श्रीकृष्णैकालंवनत्वेनैव शृङ्गाररसं विवृतवान्। तत्र तावन्नायकशिरोरत्नस्य यथा कथञ्चित् परिशीलयितुर्मनोनयनादेः समाकर्षकस्य श्रीकृष्णस्य मुख्यनायकत्वे धीरोदात्त-धीरललित-धीरशान्त-धीरोद्धतैः सह पूर्णतम-पूर्णतर-पूर्णैस्त्रिभिर्गुणितैर्द्वादश। पत्युपपतिभ्यां गुणने चतुर्विंशतिः। पुनश्चानुकूल दक्षिण शठ धृष्टैश्चतुर्भिर्गुणने षण्णवति प्रभेदा निरूपिताः, निरूप्य च केषांचिद्बहिर्मुखानांकदाचिदत्र दोषदृष्टिरुत्पद्यतेति परमोत्कर्षो रसस्यात्रैवौपपत्य एव नतु पत्याविति भरतवचने दृढीकृतः धीरोदात्तादयो द्वादशामृतसिंधावुदाहृताः। रुक्मिणं युधि विजित्येत्यादिना रुक्मिण्यादीनां पतिरिति पतिरुदाहृतः। कात्यायनि महामायेत्यादिना तास्वेव कीयतीनांतु पतिभावो हरावभूदिति दुर्गाव्रतपरासु पतिभाववतीनां कासाञ्चिदपि तथात्वे गौणतया दर्शितः। अन्ये च शतधृष्टाद्या अप्युदाहृताः। ततश्च नायिकानां कन्या-स्वकीया-परकीया भेदतस्तिसृणां मध्ये स्वकीयापरकीययो र्मध्या-मुग्धा-प्रगल्भा इतिभेदैः षट् पुनश्च धीरा-अधीरा-अधीराधीराभिर्द्वादश। कन्या केवलं मुग्धाथस्वीया परोढा चेति त्रिधा इति पंचदश प्रभेदाः। पुनरभिसारिकेत्याद्यवस्थाष्टकेन विंशत्युत्तरं शतं। अग्रत उत्तम-मध्यम-कनिष्टा इति त्रिविधैः षष्ठ्युत्तर शतत्रयी नायिकाभेदानामिति निर्णाय स्वीयोदाहरणं मुख्यतया रुक्मिण्यादिषु गौणतया दुर्गाव्रतपरासु कासुचित्कन्यास्वपि दर्शितं। परकीयोदाहृतिर्व्रजे श्रीराधिकादिषु धन्यादिष्वपि दर्शिता। ततश्च नीरसानां निरसनाय "वहु वार्य्यते यतः खलु यत्र प्रच्छन्नकामुकत्वं च। याच मिथोदुर्ल्लभता सा परमा मन्मथस्य रतिरिति" भरतमुनि सम्मत्या, "वामता दुर्ल्लभत्वं च स्त्रीणां या च निवारणं। तदेव पञ्चवाणस्य मन्ये परममायुधमिति" रुद्रसम्मत्या, यत्र "निषेधविशेषः सुदुर्ल्ल-

भत्वं च यन्मृगाक्षीणां । तत्रैव नागराणां निर्भरमासज्यते हृदयमिति" संहितासम्मत्या "अनन्यशरणा स्वीया परगाहार्य्या पराङ्गणा । अन्यास्तु केवलप्रेम तेनैषा रागिणी मतेति" शृङ्गारतिलकसम्मत्या च परोढ़ोपपत्योरेव सकल सहृदयसाक्षिको रसनिर्य्यासास्वादो दृश्यते ततश्च तयोरेव नायकोत्तमत्वमेव निर्द्धारितं । तत्राप्यर्वाचीन–साहित्यदर्पणकारादिभिर्यदत्र दोषा आसज्यंते तत्र कारणमधर्म स्पर्श एव तत्परिहारार्थमाह- लघुत्वमिति अत्रोपपतौ कैश्चिद् यल्लघुत्वमुक्तं एतत्प्राकृतनायक एव, तत्रैवौपपत्यस्य वैधर्मात् । तस्य च दुरदृष्टजनकत्वात्तस्य च नरकपातित्वान्पर्य्यवसाने दुःखमात्रोपादानत्वेन लघुत्वम् । तथा तच्चेष्टितस्य काव्वनाख्यगतत्वेनोपादेयतया स्वादेन "यदधर्मकृतः स्थानं सूचकस्यापि तद्भवेत इतिन्यायाच्चर्वणदशायां सभ्यानामपि तादृ्यापत्ते श्च विधर्मस्पर्शात् । न तु कृष्णे धर्माधर्मनियन्तृचूडामणीन्द्रे धर्माधर्मादि समस्तवस्तु सृष्टिस्थितिसंहारकारकभ्रूविजृंभमात्रस्यादिपुरुषस्याप्यंशिनि स्वयं भगवति श्रीलीलापुरुषोत्तमे नरवपुषि । तथैव तदीय शक्तिसमुदायमुख्यतमायां ल्हादिनीमहाशक्तौ श्रीगोपिकारूपायां च न संभवेदेव । तदा तच्चरितास्वादकानामपि "विक्रीडितं व्रजवधूभिरिति' "तद्वाग्विसर्गो जनताघविप्लव" इति "तदेवसत्यं तदुहैव मंगलमित्यादिभिः" सर्वोत्तमत्वमहाफलश्रवणाच्च । प्रत्युतंतत्रैव नायकोत्तमत्वं प्रसंजितमिति । अतएव ग्रंथकृतैव नाटकचन्द्रिकायां "यत्परोढ़ोपपत्योस्तु गौणत्वं कथितं बुधैः । तत्तु गोपीश्च कृष्णं च विनेति प्रतिपद्यताम्" । अलङ्कारकौस्तुभकृद्भिरपि "अप्राकृते परोढ़ारमणी रतिरेव सर्वोत्तमतया भूयसी श्रूयते । न तस्यामनौचित्यप्रवर्तितत्वं । अलौकिकं तु सिद्धे भूषणमिति न्यायात् । तर्कागोचरत्वञ्च । तस्मान्न कृष्णेऽयं दोषः किमर्थं नोक्तं रसनिर्य्यासास्वादनार्थं तेषां सभ्यतया तद्विषयक एव स्वकर्त्तृको रसनिर्य्यासास्वादस्तदर्थं । यदि कृष्णेऽपि तौ लघुत्वमुक्तं स्यात्तर्हि तेषां रसनिर्य्यासा-

स्वादो निर्विषय एव स्यादितिभावः। यद्वा कथंभूते रसनिर्य्यासास्वादार्थं ह्ययं च लोकगतस्वभक्तजनान् रसनिर्य्यासमास्वादयितुमवतारिणि "स्वदेश्चौरादिकाद्धेतुसर्णांताद्च्यभः" तस्य तु स्वकर्त्तृको रसनिर्य्यासास्वादः प्रकटलीलायामप्रकटलीलायां च सदैव वर्त्तत एव। ता एव जन्मादिलीलाः प्रपञ्चजनेषु कृपया दर्शिताश्चेत् प्रकटास्ता एव चक्षुर्भिस्तिरोधापिताश्चेदप्रकटा उच्यते न तु प्रकटाप्रकटयो र्लीलयोः स्वरूपतः किंचिद्वैलक्षण्यमस्तीति। यदुक्तं भागवतामृते—"अनादिमेव जन्मादिलीलामेष तथाद्भुतां। हेतुना केनचित् कृष्णः प्रादुष्कुर्य्यात्कदाचन" इति। तथा च श्रीवैष्णवतोषण्यामपि दन्दवक्रवधानन्तरं "रामेण सार्द्धं मथुरां प्रणीते" इति "तास्ताः क्षपाः प्रेष्ठतमेनेत्यादिना" "यथा समाधौ मुनयोऽब्धितोये" इत्यन्तेन व्याख्यानेन। तद्यथा—अत्र विगाढभावेन तीव्राधयः सत्यो मतोऽन्यं सख्यादिकमपि न सुखाय ददृशुः। ततश्चाधुना तु सुखाय पश्यंतीति वियोगो नास्तीत्यर्थः हे उद्धव ! भवद्द्वारा तासु संदेशानुसारेण श्रीवृन्दावनस्यैवाप्रकटप्रकाशविशेषप्रवेशात्तासां नित्यं मत्प्राप्तेरितिभावः। ननु पूर्वोक्तानुसारेण गोलोकाख्ये वृन्दावनस्य प्रकाशविशेषे तस्मिन्नस्ति प्रकटलीला सदृश्येवाप्रकटलीला। तर्हि कथमुभयोरेकत्र समावेशः उच्यते प्रकटलीलायाः अप्रकटप्रकाशस्य चाभेदेनैवाप्रकटलीलाप्रकाशौ प्रतिपन्नाविति दृश्यते। तदनन्तरपद्येन 'ता नाविदन् मय्यनुरक्तविद्धधियः स्वमात्मानमदस्तथेदम्। यथा समाधौ मुनयोऽब्धितोये नद्यः प्रविष्टा इव नामरूपे।" अस्यार्थः तास्तथाभूता विरहोत्कण्ठातिशयेनाभिव्यक्तदुर्द्धरमहाभावाः सत्यः। अथ कदाचित् तद्दर्शनार्थं गते मयि लब्धो योऽनुषंगो महामोदनाख्यव्यक्तिकारी पुनः पुनः संयोगस्तेन वद्धा धीर्यासां तासां तथा भूताः सत्यः, स्वं ममतास्पदं आत्मानमहंकारास्पदं च अदः प्रकटलीलानुगतत्वेनाभिमतं यथा स्यात्तथा नाविदन् किंतु द्वयोरैक्येनैवाविदुरित्यर्थः। प्रकटप्रकाशस्य तल्ली-

लायाश्चाभेदेनैवाप्रकटनद्वयमजानन्निति विवक्षितम् । ततश्च नाम-रूपं च तस्मिंस्तन्नामरूपात्मनि प्रकटप्रकाशविशेष प्रविष्टा इव न तु प्रविष्टा वस्त्वभेदादित्यर्थः । तत्र प्रकटाप्रकटलीलागतयो-र्नामरूपयोरभेदे दृष्टान्तः-यथा समाधौ मुनयोऽब्धितोये इत्यादि श्रीकृष्णसन्दर्भे अष्टपंचाशदधिकशततमे वाक्ये-अयं हि सर्वभूता-नामादिरन्तोऽतरं वहिरित्यादि द्वाभ्यां । यथाऽहंकारो भूतादिः सर्वेषां भूतानां खादीनामाद्यन्तादिरूपः । अहङ्कारांतर्गतान्येव खा-दीनीत्यर्थः । यथा च खादिनी भूतानि भौतिकानां शरावसैंधवादी-नामाद्यन्तादिरूपाणि, खादीनामन्तर्गतान्येव तानीत्यर्थः । एवं एतानि प्रकटलीलागतेषु परमार्थसत्यवस्तुषु वर्त्तन्ते युष्माकं प्रकट-लीलाभिमान्यहंतास्पदमात्मानं अप्रकटलीलाभिमान्यहंतास्पदेना-त्मना ततो व्याप्तः । एवमिदंताहंतास्पदं यदुभयं तच्च पुनः परे प्रकटं अदृश्यमानेऽपि तस्यां वृन्दाटव्यां विहरमाणेऽन्तरे नित्यमेव युष्मत्संगिनि मयि आश्रयरूपे आ भाति विराजमानं पश्यतेति । तस्मात् प्रकाशभेदादेव तद्वस्त्वादि भेदव्यपदेशो विरहसंयो व्यव-स्था चेति इदमत्रापि व्यक्तमितिदिक् । तस्मादस्माद्वृन्दावनादप्रकट-प्रकाशस्य सर्वात्मत्वैकरूप्ये सत्येव तेषां व्रजवासिनां तत्र वासः संभवेदिति यथारीत्या प्रकटे श्रीकृष्णस्य तत् पित्रादीनामन्येषां सपरिवाराणां गोपादीनां च यत्प्रकारकस्थानं तथैवाप्रकटप्रकाशेऽ-पीति प्रकरणार्थः सिद्धः । लघुत्वमत्रेत्यत्र केचनैवं व्याचक्षते । तद् यथा—तत्राशंक्य समादधाति लघुत्वमिति—पद्येन अत्र चाशंकानुवादो लघुत्वमत्र यत्प्रोक्तमिति । अयमर्थः ननु "शृंगो हि मन्मथोद्भेदस्तदागमनहेतुकः । उत्तमप्रकृतिप्रायो रसः शृंगार इष्यते" । इत्यनर्वाचीननिरुक्तानुत्तमप्रकृतिप्राये इत्युक्तेरुज्वलशुचिप-र्य्याये रसेऽस्मिन्नधर्म्ममयमौपपत्यमंगत्वाय नोचितं । जारः पाप-पतिः समाविति त्रिकाण्डशेषादिदर्शनेन नाम्नोऽपि तस्य निन्दा-गर्भमेव लभ्यते । नाट्यालंकारशास्त्रयोस्तु तस्य न्यक्कार एव श्रूयते यदुक्तं तन्मतं संगृह्य साहित्यदर्पण-उपनायकसंस्थायामित्याद्येन

शृंगारेऽनौचित्यमित्यंतेन च। यत्तु कुत्राप्यौपपत्यवर्णनं दृश्यते तत्खलु नेष्टा यदंगिनिरसे इति दर्शयिष्यमाणवृद्धमतप्रामाण्येनांगिनि रसे तु न स्यात् किंतु अंगे रसे सोपहासमेवेति गम्यते। तत्पक्षं पुष्णता श्रीभगवता च "अस्वर्ग्यमयशस्यं च फल्गुकृच्छ्रं भयावहं। जुगुप्सितं च सर्वत्र ह्यौपपत्यं कुलस्त्रीया" इत्यनेन जुगुप्सितपर्य्यन्तदोषा उक्ताः। श्रीव्रजदेवीभिरपि-"निःस्वं त्यजन्ति गणिका जारा भुंक्तारतां स्त्रिय' इत्यनेन तथैवानुमतं श्रीपरीक्षितापीत्वेवमेवाक्षिप्तम्। "आप्तकामो यदुपतिः कृतवान् वै जुगुप्सितमिति" तदेवमत्र लघुत्वं जुगुप्सितत्वमिति यावद्व्याख्येयं। अतो मुनिनापि रत्नावलीनाटिकावद् यजातिचरितवच्च दाम्पत्यएव रूपत्न्यादिकृतवाच्यमाणत्वादिना दाम्पत्य एव रतिः प्रशस्ता स्यादित्येवमतं नचौपपत्ये प्रशस्या स्यादिति। तर्हि कथं तेन तद्वाक्ये नौपपत्यरतिः प्रशस्यते तत्र समाधानं तत्तु प्राकृतनायके कृष्णादवरनायके इत्यर्थः कृष्णे त्वलघुत्वे हेतुः रसनिर्य्यासेति। रसनिर्य्यासो रससारः मधुररसविशेष इत्यर्थः। एतदुक्तं भवति अत्रावतारसमय एव औपपत्यरतिः प्रत्यायिता तदेतद्दर्शके प्राचां मतेऽप्याशंकया रसविधेरवतारितानामिति तस्यैव तासामपि तदर्थं रसास्वादार्थमेवावतार इति निर्द्दिश्यते। तस्य तासां चेत्याद्यानन्तरं तदेवं श्रीमदुद्धववाक्ये ब्रह्मसंहितावाक्ये च तेन तासां नित्यसम्बन्धापत्तेः परकीयात्वं न संगच्छते। तदसंगतेश्चावतारे तथात्वप्रतीतिमायिक्येव तथा च स्वयमेव ललितमाधवे दर्शितं पौर्णमासीगार्ग्योः संवादे- "गार्गी-नूनं गो-अड्ढणादि गो एहिं चंदाअलीपहुदीणं उद्वाहो मा आ एणिव्वाहिदो। पौर्णः-अथ किं पतिम्मन्यानां वल्लवानां ममतामात्रावशेषिता तासु दारता यदेभिः प्रेक्षणमपि तासां सुदुर्घटमिति'। तदेव कृष्णेन तासां दाम्पत्ये सत्ये सति परकीयात्वे च मायिके सति नश्यत्येवान्ततो मायिकमंत्रतस्तन्नाशेऽनादित्वे च सूति सत्यमेव स्यात्तद्रूपत्वे च सति रसाभासः स्यादित्य-

तोऽवतारसमयस्यापरभागे स्यक्ती भवत्येव दाम्पत्यं । स एष पर्य्यवसानसिद्धान्तश्च ललितमाधवप्रक्रिययात्र निर्वाहयिष्यति । यतो वहुवर्णितविरहव्यावर्त्तनाय नित्यसंयोगमयसिद्धान्तमुक्त्वापि क्रमलीलारसस्तु तत्र न सिध्यति इति अपरितुष्य संक्षिप्तादिचतुर्षु फलरूपेषु विप्रलम्भान्तराऽप्रतिघात्यस्य समृद्धिमत उद्वाह पर्य्याप्तस्यो दाहरणरूपतया प्रमाणी करिष्यते इत्यादि । किं तु न लघुत्वमुक्तं किं तु महत्वमेवेत्याह । न कृष्णे इति तत्र हेतुमाह–रसनिर्यासेति । अत्रोच्यते यद्ग्रन्थकृतां परढौपपत्योर्निर्दोषत्वे प्रत्युतरसावहत्वे च दर्शित-प्रमाणेषु केवलसाहित्यदर्पणीयमतमाश्रित्याप्रामाण्यमभि-व्यज्य पापाद्याशंकया एव रसाभासत्वमंगीकृत्यान्यथा कल्पते तद-संगतमेव । श्रीमद्ग्रन्थकृद्भिर्भरतादीनां मतमाश्रयद्भिः साहित्यदर्पणी-यमतस्य परित्यक्तवान् । तथा च तदीयप्रतिज्ञावचनं नाटकचंद्रिकायां-‘नातीवसंगतत्वाद्भरतमुनेर्मतविरोधाच्च । साहित्यदर्पणीया न गृहीता प्रक्रिया प्राय” इति ।

ननु सर्व एव ग्रंथस्तल्लिखित एव, अस्माकं तु पापावहत्वाद् यथा कथञ्चित्तदूषण एव पुरुषार्थ इतिचेत् तर्हि श्रीकृष्णेन बाल्ये पूतनायाः हननं, पौगण्डे वत्सस्य, कैशोरे वृषस्य, देवकीभ्रातृणां स्वमातुलानां शिशुपालदन्तवक्त्रयोः पैतृस्वस्रेययोरपि च श्रीभागवत-शास्त्रप्रसिद्धमेव । भारते च मिथ्याभाषण—युधिष्ठिरपक्षपातसर्वदा छलाश्रयित्वद्रोणाचार्यवधकारित्व — स्वप्रतिज्ञात्यागित्वादिश्च यमा णानि दोषमयान्येव पापदायिनीति सिद्धयन्ति तत्कर्म्माणि । न च तेषां पूतनादीनामसुरत्वे तत्तद्धननं न दोषावहं किन्तु लोकहितार्थं गोब्राह्मणबालकादीनां रक्षणाय भक्तवात्सल्यत्वेन च गुणावहमिति वाच्यं वृषासुरवधे इन्द्रस्य सर्व्वैर्देवर्षिभिः प्रोत्साहितस्यापि महावि-पत्तेरति प्रसिद्धेः । यदि च देवत्वेऽपि महेन्द्रस्य विष्णुना मोहित-स्याऽपि ईदृश्यवस्था तदा श्रीकृष्णस्य नरलीलत्वे ततोऽप्यधिक-दोषापत्तेश्च । ननु कैर्वा तव वचसा तथा मन्तव्यं यतः श्रीव्यास-

शुकदेवादिभिः कैरपि तच्चरितानि नोट्टङ्कितानि, प्रत्युत तच्छ्रवणेनापि "य एतत्पूतनामोक्षमि" त्यादिना फलप्रापकत्वेन स्तुतानि। एवं चेदिष्टापत्तिरास्माकीनैव।

किंचानया पुराणागमप्रसिद्धया औपपत्यलीलया किमपराद्धं न च तत्र प्रमाणमस्तीति वक्तुं शक्यं, विक्रीडितं ब्रजबधूभिरिदं च विष्णोरित्यनेन प्रेमभक्तिप्राप्ति वक्तृश्रोत्रोरपि श्रवणात्। ननु यद्यप्येवं तथापि "उत्तमप्रकृतिप्रायो रसः शृङ्गार इष्यत" इति निरुक्तेः उज्वलशुचिपर्यायेऽस्मिन रसेऽधर्ममयस्यौपपत्यस्यानौचित्यात् "जारः पापपतिरिति" त्रिकाण्डशेषाच्चास्य नाम्नोऽपि निन्दागर्भश्रवणात् नाट्यालङ्कारशास्त्रयोस्तुतस्य न्यंक्कारस्य श्रुतेः। "अस्वर्ग्यमयशस्यं" चेत्यादि भगवद्वाक्यात्। "निःस्वं त्यजन्ति गणिका जारा भुक्तां रतां स्त्रिय" इति ब्रजसुन्दरीबचनात्। "आप्तकामो यदुपतिः कृतवान् वै जुगुप्सितमिति" परीक्षिदुक्तेश्च। लघुत्वं क्षुद्रत्वं जुगुप्सितं पापमित्यादि निश्चयात् विशेषतस्तदवताराबसर एव मायिक्या एव रसस्वादार्थमौपपत्यरीतेः प्रत्यायितत्वाच्च।

शमप्रकृतिका वयमौपपत्यप्रसंगमपि श्रोतुं न शक्नुम इति चेत् तर्हि युष्मन्मते शान्तरस एव रसोऽन्ये जुगुप्साऽधर्मादिमूलका एवेति न श्रोतव्याः शृंगारस्तु नैवास्वादनीयो भवतीति नखांका॥ श्यामे इति पद्ये धृष्टनायकस्य श्रीकृष्णस्यांगे ताभिः कृतान्नखांकान्न सोढ़वता भवता मूलार्थमाच्छाद्य कल्पमयात्ररसे स्वस्यौदासीन्यमेव व्यक्तिकृतं, सा यथा यद्यपि तच्छ्रीविग्रहे शतरूपा स्वेन संभवन्ति "यत्ते सुजातेति" दृष्ट्या तास्तान्नर्पयन्ति च किंतु सुकोमलमुद्रया नखादिना स्पृशन्ति मात्रं तथापि ये तदाभा सावर्णा उद्यन्ते ते च प्रतिनायिकाभिस्तादृशतया मन्यन्ते। तदनुसारेण कविभिर्वर्ण्यते इति ज्ञेयमित्येषा न चौपपत्यपरोढ़योः श्रीकृष्णब्रजसुन्दरीष्वसद्भावप्रमाणस्येति कदाप्याशंक

नीयं। लौकिकवल्लीलाकैवल्यं स्वीकृत्य श्रीकृष्णेन स्वस्मिन् मयि औपपत्ये सति युष्माकं स्व-स्व पतित्यागाद्वैधर्म्म्ये सति चास्वर्ग्यादि स्यादिति भयं प्रदर्श्य तासां भावपरीक्षणेन तन्निर्द्धारितात्। एवं "जारा भुंक्त्वारतां स्त्रियं" इत्यनेन यथा जारा अन्या रतास्त्यजन्ति तथा वयमपि तत्र रता अंततो जारेण तेन त्यक्ता इव तस्यैव फलितार्थत्वात्। एवं परीक्षितापि परदाराभिमर्शनमित्याद्युक्त्वा तयोरेव निश्चितत्वात्। श्रीशुकदेवेनाऽपि "धर्मव्यतिक्रमो दृष्ट" इत्यादिना परदाराभिमर्शनमेवांगीकृत्य तेजीयस्त्वाद्यादि दृष्टान्तेन तथावधारणात्। हरिवंशविष्णुपुराणादिष्वेवमेव वर्णनाच्च अस्तु नाम तर्हि निर्द्दोषत्वेऽधर्मपापाद्यनावहत्वे प्रमाणं ब्रूहीति ब्रूषे शृणु परीक्षित्प्रश्नानन्तरं श्रीशुकदेवेन 'धर्मव्यतिक्रमो दृष्ट' इत्यारभ्य कुशलाचरितेनैषामिह चार्थो न विद्यते। विपर्य्ययेण वानर्थो निरहंकारिणां प्रभो। किमुताखिलसत्वानां तिर्य्यङ्मर्त्यदिवौकसां। ईशितश्चेशितव्यानां कुशलाकुशलान्वयः" । तदन्ते यत्पादपरागेत्यादिना भक्तानां स्वैराचारत्वमुक्त्वा कैमुत्यं प्रदर्श्य अध्यायान्ते "विक्रीडितं व्रजवधूभिरि" त्यनेन वक्तश्रोत्रोरुभयोरपि यथा कथञ्चित् कथनश्रवणाभ्यामेव हृद्रोगरूपकामादौ सत्येव परस्याः प्रेमलक्षणाया भक्तेर्लाभ इति कैमुत्येन यदीयं विक्रीडितमीदृशप्रभावं न तत्र दोषस्पर्शगन्धोऽपि कृतज्ञसुधिभिरभिधेयः। प्रत्युतं तच्छ्रवणानन्तरं सर्व्वैरपि तत्परैर्भवितव्यमिति विधिश्चोक्तः।

किञ्च तादृश-राजसभायां परीक्षित् प्रश्नानन्तरं श्रीमन्मुनीन्द्रेण तत् समक्षं ग्रहर्क्षतारानिकरायमानानां श्रीमद्व्यासनारदादीनां साक्षात् सिद्धान्त-सुधारस-पूरेण तत्सदसि चकोरान् सरसीकृत्य यन्निरधारि। तथैव श्रीकृष्णसन्दर्भे गोपीनां तत्पतीनां चेति पदव्याख्यानेन स्वारसिकी लीलाप्रसंगे च यत्सुनिश्चितम्॥ तत्राप्यर्व्वाचीना विप्रतिपद्यन्ते केवलं बलेनैव स्वमौढ्यस्य ततोऽप्रतिपत्तये च। आः किं वान्यैः प्रमाणैः श्रीमज्जीवगोस्वामिचरणैः

सर्वं वैमत्यं निराकृतं श्रीभक्तिसन्दर्भे-यथा-कामाद्द्वेषाद्भयात् स्नेहाद् यथा भक्त्येश्वरे मनः । आवेश्य तदघं हित्वा बहवस्तद्गतिं गताः । ३२० ॥ यथा विहितया भक्त्या ईश्वरे मन आवेश्य तद्गतिं गच्छन्ति तथैवाविहितेनापि कामादिना बहवो इत्यर्थः । तदघं तेषु कामादिषु मध्ये यद्द्वेषभययोरघं भवति तद्धित्वैव भयस्यापि द्वेषसंवलितत्वादघोत्पादकत्वं ज्ञेयम् ॥

अत्र केचित कामेऽप्यघं मन्यन्ते । तत्रेदं विचार्यते । भगवति केवलः काम एव पापावहः किम्बा पतिभावयुक्तः अथवा उपपतिभावयुक्त इति । स एव केवल इति चेत स किं द्वेषादिगणपातित्वात् । तद्वत् स्वरूपेणैव । परमशुद्धे भगवति यदधरपानादिकं यच्च कामुकत्वाद्यारोपणं तेनातिक्रमेण वा पापश्रवणेन वा । नाद्येन । उक्तं पुरुस्तादेतत्तो चैद्य इत्यत्र द्वेषादेर्न्यक्कृतत्वात् तस्य च स्तुतत्वात् । अतः प्रिया इति स्नेहवत् कामस्यापि प्रीत्यात्मकेन तद्वदेव न दोषः । तादृशीनां कामो हि प्रेमैकरूपः । यत्ते सुजात इत्यादिना आनुकूल्ये एव तात्पर्य्यदर्शनात् । सैरिन्ध्र्यास्तु भावो रिरंसाप्रायेत्वन श्रीगोपीनामिव केवलतत्सुखतात्पर्याभावादपेक्षयैव भिद्यते न स्वरूपतः । सानङ्गतप्तकुचयोरित्यादौ अनन्तचरणेन रुजो मृजन्तीति परिरभ्य कान्तमानन्दमूर्त्तिमिति कार्यद्वारा तत् स्तुतः । तत्रापि सहोष्यतामित्यादि तदेव तस्य कामद्वेषादिगणान्तः पातित्वं परिक्लृप्त्य तेन पापावहत्वं परिहृतमित्यन्तम् ।

अथ कामुकत्वारोपणाधरपानादिरूपस्तत्र व्यवहारो नातिक्रमे हेतुः । यतो लोकवल्लीलाकैवल्यमिति न्यायेन लीला तत्र स्वभावत एव सिद्धा । तत्र श्री भूलीलादिभिस्तस्य तादृशलीला रसमोहस्वाभाविकं भगवत्ताद्यननुसंधानमपि कामुकत्वादिमननमपि च तदभिरुचितत्वेनैवाभिगम्यते । तथा तत् प्रेयसीनामपि तत्स्वरूप-

शक्तिविग्रहत्वेन परमशुद्धरूपत्वात्। तदितरे न्यूनत्वाच्च तदधरपानादिकमपि नानुरूपं। पूर्व्वयुक्त्या तदभिरुचितमेव। न च प्राकृतरामाजने दोषः प्रसंजनीयः। तदयोग्यं तादृशं भावं स्वरूपशक्तिविग्रहं च प्राप्यैव तदिच्छयैव तत् प्राप्तेः।

अपापश्रवणेन च न पापावहोऽसौ कामस्तदश्रवणादेव। अतः पतिभावयुक्ते च ततुसुतरां न दोषः प्रत्युतं स्तुतिः श्रुयते। संपर्य्यचरन्तं भक्त्या पादसंवाहनादिभिः। जगद्गुरुं भर्त्तृबुद्धया तासां किं वर्ण्यते तप इति महानुभावमुनीनामपि तद्भावः श्रुयते। मध्वाचार्य्यधृतं महाकौर्म्मवचनं-अग्निपुत्रा महात्मानस्तपसा स्त्रीत्वमापिरे। भर्त्तारं च जगद्योनिं वासुदेवमजं विभुमिति। अतएव वन्दितम्। पतिपुत्रसुहृद्भ्रातृमित्यादिना। अथोपपतिभावेन च पापावहोऽसौ यत्पत्यपत्यसुहृदामनुरित्यादिना ताभिरेवोक्तरितत्वात्। गोपीनां चेत्यादिना श्रीशुकदेवेन च। महानुभावानां मुनीनामपि तद्भावो दृश्यते। यथा पाद्मोत्तरखण्डवचनं- पुरा महर्षयः सर्व्वे दण्डकारण्यवासिनः। दृष्ट्वा रामं हरिं तत्र भोक्तुमैच्छन् सुविग्रहम्। ते सर्व्वे स्त्रीत्वमापन्नाः समुद्भूताश्च गोकुले। हरिं संप्राप्य कामेन ततो मुक्ता भवार्णवात्। अतः पुरुषेष्वपि स्त्रीभावोद्भवाद्भगवद्विषयत्वात् न प्राकृतकामो किंतु साक्षान्मन्मथ इति श्रवणात् आगमादौ तस्य कामत्वेनोपासनाच्च भगवदेकोद्भावितोऽप्राकृतकाम एवासौ इति ज्ञेयम्। श्रीमदुद्धवादीनां परमपि श्रीगोपीसदृशभावलिप्सा श्रुयते।

एताः परं तनुभृतो भुवि गोपवध्व इत्यादौ। किं वहुना श्रुतीनामपि तद्भावो बृहद्वामने प्रसिद्धः। यतस्तत्र श्रुतयोरपि नित्यसिद्धगोपिकाभावाभिलाषिण्यः सत्यः तंत्रेणैव तद्गणान्तः पातिन्यो वभूवुरिति प्रसिद्धिः। एतत् प्रसिद्धिसूचकमेवं तदुक्ता ताभिः निभृतमरुन्मनोऽक्षदृढयोगयुज इत्यादि। विस्पष्टश्चायमर्थः। यद्ब्र-

ख्यं तत्वं शास्त्रदृष्ट्या प्रयासबाहुल्येन मुनय उपासते तदर-योऽपि यस्य स्मरणात्तदुपासनां विनैव ययुः । तथा स्त्रियः श्रीगोपसुभ्रुवस्ते तव श्रीनन्दनन्दनरूपस्य उरगेन्द्र देहतुल्यौ यौ भुज-दण्डौ तत्र विषक्तधियः सत्यस्तवैवाङ्घ्रि सरोज सुधा स्तदीयस्प-र्शविशेषजातप्रेममाधुर्य्याणि ययुः । वयं श्रुतयोऽपि समदृशः स्तुल्यभावा सत्यः समास्तादृशगोपीकात्वप्राप्त्या तत् साम्य-माप्तास्ता एवाङ्घ्रिसरोजसुधा मया तावत्य इत्यर्थः । अर्थवशा-द्भक्तिविपरिणामः । अङ्घ्रीति सादरोक्तिः अत्र तदरयोऽपि ययुः स्मरणादित्यनेन भावमार्गस्य झटित्यर्थसाधनत्वं दर्शितम् । समदृश इत्यनेन रागानुगाया एव साधकतमत्वं दर्शितम् । अन्यथा सर्वसाध्य साधन विदुष्यः श्रुतयोऽन्यथैव प्रकर्त्तीरन् । श्रुत्यनुभवसिद्धा तासामानुग्ये मैव निरवाधीति प्रकरणार्थश्च ।

ननु तव सिद्धान्ताः फलितार्था अभविष्यन्नेव । ययौपपत्य-परोढत्वयोः सत्यत्वमभविष्यन् । वयं तदेव मन्यामन्यामन्वहे तस्मान्मूलएव कुठारः । पतिश्चोपपतिश्चेत्यारभ्य सर्व्वस्मिन्नेवो-ज्ज्वलनीलमणौ मुहुर्मायिकत्वेनैव व्याख्यातम् । तद्दिग्दर्शनं यथा पतिश्चोपपतिश्चेत्यत्र पतिः पुरवनितानां द्वितीयश्च व्रजवनितानां द्वितीयत्वं तु यद्यप्यासामवतारावसर एव प्रत्यायितं नतु सर्व्व-देत्यादि । रागेणोल्लंघयन्नित्यत्र स्वजन प्रेम वशावतार लीला-वेशेन नित्यलीलामननुसन्धानस्य तासां च लीलाशक्तिर्माययैव रसविशेषपरिपोषाय तासु परकीयात्वं प्रत्यापयन्त्य तत्रौपपत्या-यितवतीति सङ्केतीकृतेत्यत्र यत कस्यचित् कवेः पद्यमुदाहृतम् खलु तादृगौपपत्यप्रत्यायनायोत्प्रेक्षमाभिति ।

लघुत्वमत्रेत्यत्र एतदुक्तं भवति । असावतारसमये तथा प्रतीतिर्मायिकयेव ॥४॥ श्रीकृष्णेन तासां दाम्पत्ये सति परकीया-त्वेच मायिकत्वे च सति नश्यत्येव ततो मायिकम् ॥५॥

कन्यकाश्च परोढ़ाश्चेति सोऽयं चावतारलीलादृष्ट्यैव व्यवहारो न वस्तुतः॥६॥ नासूयन्निति । तस्य श्रीकृष्णस्य नासूयन्निति। तस्य कृष्णस्य माययापि स्वे स्वे दाराविवाहसमयत एव मायारचितास्तान् इत्यादि । पतिम्मन्यान प्रति माया प्रतिमाया प्रकटयाभास ॥७॥ गोप्यैव्युढ़ो इत्यपूर्व्ववद्भ्रमानुवाद एव । शक्तिमेवादृत्य तदुपयुक्तां लीलाशक्तिमेवादृत्य तद्वारावतारितानां नित्यप्रेयसीनामेव तासां परदारत्वभ्रमेण यथारसस्य विधिः प्रकारविशेषः संभवति तथा जन्मादिलीलाया नित्यत्वं विस्मार्य्य प्रकटीकृतानामित्यर्थः । तदाशंसया हेतुः रसिकेति, तस्माल्लीलाशक्तिप्रेरिततया कृतं तासां परोढ़ात्वप्रत्यायनं परसंगत्यभावश्चेत्यादि । समृद्धिमदुदाहरणे-तवात्र परिमृग्यतेत्यत्र सर्व्वे ज्ञातश्रीकृष्णविषयकाशक्त्यानन्तरं यदि तासामन्यभर्त्तृकात्वं वृडो मिथ्यात्वेन व्यक्तं स्यात्तदैव जुगुप्साव्यत्ययस्थापयनवत् धार्म्मिकस्य श्रीव्रजराजस्य सभायां अपि धार्म्मिकरीत्या स्थापयितव्या, ततः 'योगमायामुपाश्रित' इति "नासूयन् खलु" इत्यादिन्यायेन यस्याः मायाया सोऽयं प्रपञ्चः सैव समाधात्री । निजेश्वरलीलाकौतुकात् तत्तत्कल्पितवती मध्ये चासूयापरिहारार्थं समाहितवतीति गम्यत इत्यादि । कृष्णसन्दर्भगोपालचम्पूमनु चैव विवेचितं बहुशः ।

स्वरूपसिद्धानां भगवद्दाराणामपरकर्त्तृकबलात्कारपरिहारार्थंतत्तदाकारतया ये स्वद्वारास्तान स्वे इत्यादि, एतदुदितमुपलक्षणं, तदेव तासां पतिम्मन्येष्वबाह-शयनादिष्वेब च स्वरूपसिद्धा आबभ्रिरे अन्येषु चान्यदा एवेति गम्यते तावदेव युक्तं तासु च मर्य्यादारक्षणोत्कण्ठावद्धनैकप्रयोजनत्वान्न स्या इत्यादि । चम्पूमनु च पौर्णमास्याकारितायाः यशोदानन्दिन्याः सिंहवाहिन्या वचः पूर्व्वत एव तावदुभयविधात्र नापूर्व्वतया मन्तव्याः । पूर्व्वासां सजातीया हि द्वितीया मयैव निर्म्मिताः, संज्ञायाश्च यावत् स्त्यास्तन्मायाकल्पिताश्चच । अत्र श्रीव्रजराजं प्रति तथा वर्णयितव्यत्वात

नायं श्रियोऽग इत्यत्र पूर्वोक्तमायामात्रव्यतितान्यथात्वमेव द्रढयतीति ९ अथ नित्यप्रिया इति नित्यप्रियाणां मायां बिना कथमुपपतिः स्यात् १० नेष्टा यदङ्गिनीति नित्यप्रेयसीनां तासां यथा रसस्य विधिरित्यत्र बहुत्र ११ समृद्धिमत्प्रंघट्टकगद्यपद्यमयं बहुशो निर्णीतं। तदन्ते च यथा अथ कंसवधात् प्राचीनानां लीलानां सदद्यस्तनतां मत्वा यदुपासनं क्रियते तत्खलु एवं विहारैः कौमारैः कौमारं जहतुर्व्रजे । निलायनैः सेतुबन्धैर्मर्कटोत्प्लवनादिभिरित्यादिरीत्यावतारलीलावत् पूर्वावतारलीलावत् पूर्वमतीतानामपि तां तां निजलीलां भक्तभक्तिविशेषानुरोधेन तदा तदा करोतीत्येव मन्तव्यम् । त्वं भक्तियोगपरिभावित इत्यादेः ।

तत्र बाल्यलीलोपासना ग्रहिला अपि दृश्यन्ते । किंतु श्रुतेच्छितपथत्वेनैव ता द्रष्टव्या न तु स्वमनोरथमानकल्पितत्वेनेति गम्यते । तत्र स्वेच्छया रचिताया अपि संभोगलीलायाः सम्पन्नत्वं एव सम्मतं न तु समृद्धिमत्वं, महाप्रवाससंस्कारानन्तरभावित्वाभावात् अत एव कासाञ्चिल्लीलानां प्रकट प्रकाशगत तुल्यानां तत्तन्मन्त्रपालकसंप्रदायाविच्छिन्नपरंपरा सु रोधेन नित्या स्थितिरेव गम्यते न तु सर्व्वासामपि प्रकटलीलानां कालियह्रदप्रवेशलीलानां महादुःखमयत्वेन कासाञ्चिदन्यासामपि मुहुरागतभयव्याकुलीकृतत्वेन प्राकृतमिश्रत्वेन बिरोधात् "योग एव भवेदेष बिचित्र कोऽपि मादन" ते योग एवेति सखेदानामेव तासामुपादानेन सहस्रधीसख्योल्लेखनेन च प्रत्याख्यानात् प्रत्ययि तासां नित्यत्वे चित्रतुल्यता प्राप्त्या लीलात्वहानाच्चेति इत्यादि नेष्टा यदङ्गिनीत्यत्रासमृद्धिमत्प्रथष्टके कृष्णसन्दर्भे गोपालचम्पूमनु च बिवृतं तत्तद्व्याख्यानां सारो यथा नेष्टेत्यत्र, तदुक्तं साहित्यदर्पणकारेण परोढ़ां बर्जयित्वेत्यादि । तदेतच्च गोकुलाम्बुजदृशां कुलमन्तरेणेति तास्तु स्तुता इत्यर्थः आशंसयेति, तादृशक्रमलीलासाध्यत्वेन रसविशेषास्वादनाय सर्वशक्तितां सर्व्वेश्वरतामप्यनादृत्य तदुपयुक्त

लीलां प्रवर्त्तिताः, स्वस्वपतिगृहमनुवर्त्तीता । परास्तु कृष्णमात्र-पतिपरायणाः स्व स्व पतिगृहमित्यादि ।
अत्रेदं विचार्यते, श्रुति-स्मृति-श्रीभागवतानां व्याततया श्रीमन्मध्वाचार्य-श्रीरामानुजाचार्य-श्रीवल्लभाचार्यचरणैर्विवृतानां श्रीभगवल्लीलानां मायिकत्वं कियद्दिनस्थायित्वं यत्पौनः पुन्येन शतवृत्तितया कंठरवेणैवाचाते । तत्रैवं पृच्छामः तत्किमैन्द्रजालिककार्य्यत्वादिन्द्रजालवन्मायिकं किं वा अज्ञानकल्पितशुक्तिरजतवद्बहिरंगायाः मायाख्यायाः शक्तेः कार्य्यं अथवा लीलाशक्तिकृतं सर्वम् । नाद्यं ऐन्द्रजालिकस्य नयनादेः पृथक्त्वेन सावधानतया स्थितस्यान्यदीयव्यामोहनार्थमेव तत्तत्कृतेः प्रकटमभूत न तु स्वस्यं तदाविष्टत्वं प्रकृते तु नायिकानायकयोरुभयो रुभयोरपि तत्र तत्राविष्टता भवतैव सुप्रथितैव । नापि द्वितीयं यत्र यत्र श्रीकृष्णलीला तत्र तत्र मायासम्बन्धाभावाम् । माया परै त्यभिमुखे च विलज्जमानेति द्वितीयस्कंधसिद्धान्तितत्वात् । वैष्णवतोषण्यां यशोदामोहन-रासादिलीलायां तथैव समाहितत्वात् । श्रीभगवत्सन्दर्भे च श्रियायुक्त इत्यस्य व्याख्यानेऽन्तरंगवहिरंगशक्त्योरवतारणानन्तरं पूर्वस्यां भगवति विभुत्यादि विस्मृतिहेतुर्मातृभावादि प्रेमानन्दविशेष इत्युक्तत्वात् । न च तस्यास्तस्मिन् भावे तथा विस्मृतिहेतुत्वमिति वाच्यं । विभुत्वादि मातृभावादि इति द्वयोरप्यादिशब्दग्रहणात् सर्वेषु एव रसेषु तथा विस्मृति-प्रेमानन्दमये नावश्यकत्वाच्च । नापि तृतीयां लीलाशक्तेः स्वरूपशक्तित्वात् । स्वरूपशक्तिप्रकाशितत्वस्य नित्यत्वस्य च मिथो हेतु मत्ता ज्ञेयेति भगवत्सन्दर्भे न विद्यते यस्य चेति गजेन्द्रमोक्षणीये पद्ये व्याख्यातत्वात् ननु कामाञ्चिदेव लीलानां मायिकत्वं वयं मन्यामहे न तु सर्वासामेव । परोढ़ोपपत्योस्तु कंठरवेणैव वदामोऽन्यासां कालियदमनादि कासाञ्चित् प्रच्छन्नतया भक्तहृदयव्याकुलीकत्वप्राकृतमिश्रत्वादिदोषदर्शनात् अवतारलीलाया असार्वदिकत्वात् कादाचित्कत्वा-

च्चेत्तथात्वे पर्य्यवसानं स्यादस्तु नाम अप्रकटे भोगनाम्नि नित्ये धाम्नि स्वारसिकी मन्त्रमयी भेदाभेदाभ्यां नित्यत्वेन नित्यस्थितित्वेन नित्यलीला विराजन्त एव ताभ्यामिव सर्वाभीष्टसिद्धि र्भविष्यत्येवेत्यलमनयावतारलीलाया, सत्यं सत्यं एवं चेत्तर्हि स्थालीपूलाकन्यायेन सर्वासामेव लीलानामसत्यत्वमेव कथं न स्यात्। भो ! स्यादेव यतः कंसवधात् प्राचीनानामिति व्याख्यांतत् प्रत्याख्यानात् लीलात्वहानाच्चेत्युक्तत्वाच्च। किं च एका नित्या अपरा अवतारलीलात्वेनोक्ता अतो नित्यानुयोगितया अनित्यत्वमुक्तमेवेति परामृश्य साधुभिः भोगो नित्यस्थितिलीलायानुसंहरते कदाप्यनेन पद्मपुराणीयवचनेन लीलामात्रस्यैव तथात्वं कृष्णसन्दर्भे दर्शितमेवेति किं पिष्टपेषणाया, ननु धन्याः स्थ भो ! धन्या यतः श्रीकृष्णसम्बन्धिलीलाजातं कदाचित् सत्यत्वेन कदाचिदसत्यत्वेन कदाचिन्नित्यत्वेन च व्याहरथ तत्रापि कदाचित् कासाञ्चित् कदाचित् सर्वासामेवेति भवदाशय एवास्माभिर्दुर्वोधः। न च परढोपपतित्वं भवदसम्मतं प्रत्युत परमाभीष्टत्वेनैव मुहुः स्थापितत्वात् नित्यलोकेऽपि तयोः स्थितिश्च भवतैव स्थापिते सति वद कथ मायिकत्वं वक्तुं शक्यते ननु परढोपपत्योर्नामापि मया अश्लीलत्वापपर्य्यायत्वाच्च मोच्चार्य्यते, यथोक्तं पतिश्चोपपतिरितिव्याख्यायां पतिः पुर बनितानां द्वितीयस्तु ब्रजवनितानामिति द्वितीयस्त्ववतारावसर एव इत्यादिना द्वितीयशब्देनैवोक्तं नतूपपतिशब्देन उपसंहितं च अथ प्रोषितभर्त्तृका इत्यत्र हि यस्य नामाप्यश्लीलतया नोच्चार्य्यते इत्यादिना श्रीकृष्णसन्दर्भे तु "मत्कामा रमणं जारमि" त्यस्य व्याख्यातव्यं तदेवमेवोक्तं "तमेव परमात्मानं जारबुद्ध्यापीति" जारबुद्ध्यापीति या जारवादिनः कल्पना सा तु असत्यैव अनर्हत्वादिना तथात्व पूर्वापराननुसंधायिनमत्रेत्यत्र धर्म—व्यतिक्रमो दृष्ट इत्यभ्युपगमवानंगीकृत्येऽपि तासां राजानूदितवहिर्मुखमततत्परदारत्वे परितोषमप्राप्य तदपि खंडयन् सिद्धान्तान्तरमाह-

गोपीनामिति इत्यादिभिराकुञ्चेति । तत्कथं मया नित्यलीलायां तस्य स्थितिर्वक्तव्या, उक्तं चेदुपन्यस्यतां पूर्वापराननुसन्धायिन् ! शृणु सावहिततया भक्तिसन्दर्भे रागानुगाप्रकरणे कामाद्द्वेषादित्यस्य व्याख्यायां परकीयोपपत्यो र्निदूषणत्वे यथा भवता स्थापितं तत्सर्वं पूर्वमेव दर्शितं विशेषतस्तत्रैवांते श्रीमदुद्धवादीनां परमभक्तानामपि गोपीभावलिप्सा श्रूयते। "एताः परं तनुभृतो भुवि गोपबध्व्य इति', "आसामहो" इत्यादि किं बहुना, श्रुतीनामपि तद्भावो वृहद्वामने प्रसिद्धः। यतस्तत्र श्रुतयोऽपि तद्गणान्तःपातिनो बभूवुर्नित्यसिद्धगोपिकाभावाभिलाषिण्यः सत्य इति प्रसिद्धिरित्यादि तथैव श्रुतिभिरपि श्रीकृष्णनित्यधाम्नि ता दृष्टा इति बृहद्वामने प्रसिद्धमिति तत्प्रघटकश्च कृष्णसन्दर्भे यथा-"आनन्दरूपमिति ते यद्विदन्ति पुराविदः। तद्रूपं दर्शयास्माकं यदि देयो वरो हि नः। श्रुत्वैतद्दर्शयामास स्वलोकं प्रकृतेः परम्। केवलानुभवानन्दं दिव्यमक्षरमव्ययम्। यत्र गोवर्द्धनो नाम सुनिर्भरदरी वृतः। रत्नधातुमयः श्रीमान् सुपक्षिगणसंयुतः। यत्र निर्मलपानीया कालिन्दी सरितां बरा। रत्नबद्धोभयतटा हंसपद्मादि संकुला। शश्वद्रासरसोन्मत्तं यत्र गोपी कदम्बकं। ततः कदम्बकमध्यः किशोराकृतिरच्युत" इति। न च ता गोपानां पत्न्यो न भवन्ति किंतु गोपजातिस्त्रिय इति बाच्यं, अग्रे वेदानां "यथा त्वल्लोकवासिन्यः कामतन्त्रेण गोपिका। भजन्ति रमणं मत्वा चिकीर्षाजनिनस्तथेति" प्रार्थनान्तरं भगवता प्रार्थनानुरूपवरदानात्। यथा-"जारभावेन सुस्नेहं सुदृढं सर्वतोऽधिकमि" त्यादि। गोबिन्दवृन्दाबननाम्नि बृहद्गौतमीये श्रीकृष्णस्य श्रीमुखवाक्यस्य श्रीकृष्णसन्दर्भे प्रमाणितत्वात् तद्यथा-इदं बृन्दाबनमित्यारभ्य "अत्र या गोपपत्न्यश्च निवसन्ति ममालये। योगिन्यस्ता मया नित्यमिति"। न वात्र ब्याख्यान्तरावकाशलेशोऽपि "पत्युर्नो यज्ञसंयोगे" इति पाणिन्यनुशासनात् "पत्नी तत्कर्त्तृक यज्ञस्य फल-

भोक्तीति' सिद्धान्तकौमुदी निरुक्तेश्च। ननु सवमेतदास्वीकुम्महे,यदाप्रकटप्रकटयोरैक्यरूपेणैव तत्तल्लीलाया नित्यस्थितेरेवास्मद्वचनमेव प्राश्यामो नान्यथा तदपि श्रुत्वा न विस्मरत यथा श्रीकृष्णसन्दर्भे एकसप्तत्युत्तरशततमे वाक्ये तदेवं स्वारसिकी अप्रकटलीला दर्शिता। अथाप्रकटलीले द्वे अप्यर्थ विशेषेणाह "गोपीनां तत्पत्नीनां च सर्वेषामेव देहिनाम्। योऽन्तश्चरति सोऽध्यक्ष एष क्रीडनदेहभाक् (१७१) अतः अन्तः स्थितः यथा स्यात्तथा गोपीनां तत्पतीनां तत्पतिम्मन्यानां क्रीडनदेहभाक् सन् तेषामेव गोकुलयुवराजतया अध्यक्षश्च सन् यश्चरति स एष प्रकटलीलागतोऽपि भूत्वा सर्वेषां विश्ववर्त्तिनां देहिनामपि क्रीडनदेहभाक् सन् तेषां पालकत्वेनाध्यक्षोऽपि सन् चरति। तस्मादनादित एव ताभिः क्रीडाशालित्वात् सिद्धावात्र शक्तिरूपाणां तासां संग एव स्तुत एव परदारदोषोऽपि नास्ति। एतत्पद्यव्याख्यानं-गोपालचम्पूमध्ये च अन्तरंगान् प्रति स्वयमर्थः गोपीनां काश्चिदव्यूढाः काश्चिद् व्यूढा इति द्विधात्र प्रसिद्धा, वस्तुतस्तु नित्यसिद्धानां सर्वतः श्रेयसीनां प्रेयसीनां अन्यासामपि नानाभाव समृद्धानां कुमारीतरुणी-वृद्धानां तथा यथा। सम्भवं तासां पतीनां तदुपलक्षिततया कुमारततीनां सर्वेषामपि तदेकजीवानां जीवानां यानि तत्तादृंचितता विस्ताराय तदीयक्रीडासाधनदेहानि तदाशक्तः सन् अन्तः शब्दाभिहिते महिते जगन्नेत्रादन्तर्हिते सदाभवे स्ववैभवे यश्चरति क्रीडति स एष एवाध्यक्षः कदाचिज्जगत्प्रत्यक्षः सन् क्रीडति। तस्मान्निजप्रेयसीभिः समं अनादित एव मिथुनतेति कथनादौपपत्यं नोपपत्स्यहं किंतु परमव्योमाधिपलक्ष्मीनारायणवद्दाम्पत्यमेव तदर्हं भवतीति।"

किंच सर्व्वैर्ज्ञातश्रीकृष्णविषयकाशक्त्यनन्तरं यदि तासां अन्यभर्त्तृकात्वं व्रजे मिथ्यात्वेन व्यक्तं स्यात्तदैव जुगुप्साव्यत्ययेन रसः संपद्यते, तस्माद्व्रजसभायामपि नव्यमित्यादिनातद्-

वादस्य पौर्णमासीदेव्यो द्वारा यत्समाधानं विहितं तदपि महान-
विहितमेव विप्रादिसाक्षिक श्रीमन् नन्दादिवन्धूवर्गसमाधानपूर्वकं
पितृभिरन्यगोपेभ्यो वितीर्णत्वात् यदि चोभयमुभयमर्पितयोऽनु-
गानां श्रीमन्नन्दादीनां समक्षमेव तदुद्वाहो निष्पन्नः तर्हि पुनरन्य-
कर्त्तृक वचनादिव तत्सर्वंतैरेव कथं मिथ्येति प्रतीयतां । न च
भ्रान्त्या कर्त्ता प्रत्यक्षीकृतपदार्थः पदार्थन्तरत्वेन ब्रह्मणाऽपि ग्राह-
यितुं शक्यः, कृतनिश्चयस्य तस्य स्वस्मिन् प्रामाण्यनिश्चयात् च
यथाकथञ्चिद्देव्या वचनेन समाधातव्यं । तथापि पुनरुद्वास्ह्य सर्व-
था तदसस्मतिरेव भावयिषित्वा वा देव्या स्वकल्पितगोपीनां
दर्शनया सर्वेषामेव भ्रान्तिदूरीकरणाय ताभिः सह श्रीकृष्णेन
विवाहे श्री व्रजराजस्य सम्मतिः स्यादेवेति वक्तुं युज्यते । स्वयमेव
निष्पादितपूर्वव्यवहारस्य मायाया वचनादेवाप्रेमाणीकर्त्तुमश--
क्यत्वात् । न च कृष्णेन परमेश्वरत्वात्तद्दोषाणामग्रहणात् स्त्री रत्-
न्नीनि स्वीकृतान्येवेति वाच्यं । पूर्वावतारेनैव दाशरथिना जान-
क्याः कृतपरीक्षाया अपि रजकमुखाद्द्वादश्रवणमात्रादिव परि-
त्यागात् । ननु तदवतारस्तथैव मर्यादापरत्वमेव तस्यासीत् ।
अस्य दुर्ल्लीलशेखरता तन्मर्य्येव सर्वासु लीलासु प्रसिद्धैव ।
सत्यं श्रीकृष्णस्य. मर्य्यादापरता परता स्वयमेव न कैश्चिद्दृष्टा
अपि मुहुः स्थाप्यते । चेत्स्वयमेवेदानीं पुन र्दुर्लीलतांगीक्रियते ।
इष्टापत्तिरास्माकीनैव एतावता कष्टकल्पनेन न किमपि प्रयोजनं ।
यथास्थितमेवास्तु तत्सर्वमित्यलं विस्तरेणेति दिक् । यत्तु मुन्या-
दिना सत्यत्वे व्यक्तीकृतास्ता गोप्यः स्वरूपेण रमणं प्रापु र्माया-
कल्पिता गोप्यस्तु स्वस्वपतिमित्येव श्रीभगवत्संमतं, दृश्यते च
संज्ञाच्छायादिवत् कल्पनायामेव व्यक्तत्वमेव परिणामः सर्वत्र
इत्युक्तं । तेन स्वस्य कारुण्यमेव व्यक्तीकृतं । पूर्वं यदा यदा तासां
व्रतलोपप्रसंगप्राप्त आसीत्तदा तदैव मायैव समादधात । अनेन
सर्वास्वेव श्रीकृष्णेन भवन्मते परिणीतासु सतीषु पूर्वोढारो-

गोपसंज्ञा-गृहस्थ्यनाशान किं कुर्य्युरिति परामृश्यानुकंपया मायिकयो गोप्यस्तेषां भार्य्यात्वे भगवन्मतज्ञेन भवता निर्दिष्टत्वात्। न च तासां वोढ़ारो गोपाः यथा कथञ्चित् प्रवलायामेव मायिकी गोपी स्तेभ्यः समर्प्य प्रतारिताः अन्ततोऽप्रकटगीमागमनकाले ते सर्वं एव व्यापादिता इति वाच्यं। श्रीभागवतामृतधृतपद्मपुराणीयगद्ये षु "अथ तत्रस्था नन्दादयः सर्व एव व्रजवासिजनाः पुत्रदारादिसहिता दिव्यरूपधरा विमानमारुह्य परमं वैकुण्ठलोकमवापुरि" त्युक्तेः सर्वेषामेवाविशेषेण व्रजवासिपुत्रदारादिसाहित्येनैव तदारोहणस्य सम्मतत्वात्। किंचात्रैव सन्दिहानाः स्म एकस्मिन्नेव ग्रामे द्वयोरपि सार्वदिकस्थितौ सत्यां मातरपितरादीनां श्वश्र्वादीनां वा कीदृशो व्यवहारः समजनि। द्वयो र्नाम--रूपादेर्भेदाभावात् पतिभिः सह सर्वसति अपत्यादेरवश्यं भावित्वात् तत्तद्व्यवहारनिर्वाहणाय पित्रादीनां सत्यत्वे मायिकत्वे च युगपद् विद्यमानतायाः आवश्यकत्वात् एतै र्यादृशं सरसावहत्वं निर्व्यू ढ़ंतैरेतद्विचार्य्यते न वेति। न चापत्यादि र्न भावी लक्ष्म्यो इवेति वाच्यं लक्ष्मीरेव सीतात्वेनावतीर्णा विप्रादिसाक्षिकतया मातृपितृभ्यां वितीर्णा सती प्रजाः सूतेऽस्मैव एवं पार्व्वत्यापि प्रत्युत लोकवल्लीलाकैवल्यात्तदभावेऽमालरूपता लोकशास्त्रप्रसिद्धा इति बहव एव पक्षाः सतीत्यलने रनुलाक्तसंज्ञा च्छायादृष्टान्तश्चात्र न संगच्छते।-छायाया अपि सूर्य्या·यदीयेन संभोगाभोगा भावात् भवता तु तत्तन्नामरूपतया सर्वथा अभिन्नास्ता गोपेभ्यो वितीर्णा इत्येतदंशस्य ततोऽपि वैलक्षण्यात् अनेन रावणारुद्धसीतापि व्याख्याता। यच्च ललितमाधवीयप्रक्रियां समृद्धिमति मूलोदाहरणदृष्टमदृष्टं विधाय तदुदाहरणत्वे "सख्यस्ता मिलिता" इति स्वाभिमतत्वेन उक्ता वाचो युक्ते विलासः सोऽप्यविचारतयैव यत उज्ज्वलनीलमणौ ग्रन्थे श्रीजीवाशयानुसारिण्यां टीकायां व्याख्यातं यथा—"दुर्लभालोकयोर्यूनोः पारतन्त्र्याद्वियुक्तयोः। उपभोगातिरेको यः कीर्त्यते

स समृद्धिमान्'। अस्यार्थः-वियुक्तयोर्विरहिण्योर्यूनो र्नायिकानायक-योरेव पारतन्त्र्याद्धेतोरेव दुर्ल्लभा लोकयोर्य उपभोगस्तस्यातिरेक आधिक्यं स समृद्धिमान् संभोगः कीर्त्त्यते। संपन्नादिसंभोगे दुर्ल्लभे भोगे दुर्ल्लभालोकत्वस्य द्वयोः पारतन्त्र्यं अनकारणं किंतु एकस्या नायिकाया एव, तस्या हि श्वश्रू पतिम्मन्य—पित्रादीनामधीनत्वं तैर्वार्य्यमाणत्वं न तु नायकस्य श्रीकृष्णस्य तस्य हि स्वपित्रादीनामधीनत्वेऽपि न तैः स्त्रीप्रसंगे वार्य्यमाणत्वं, नायिकायाः श्वश्रू—पतिम्मन्यादिभिश्च वार्य्यमाणत्वेऽपि न तेषामधीनत्वं। अत्र तु "दग्धं हतेति" "तवात्र परिमृग्यते" त्युदाहरणद्वये द्वयोरेव राधाकृष्णयो र्ललितमाधवोक्तकथानुसारेण रुक्मिण्या अधीनत्वं वार्य्यमाणत्वं च। एवं चाधीनत्व-वार्य्यमाणत्वहेतुके दौर्ल्लभ्ये सत्युपभोगाधिक्यं युक्तिसिद्धमेव। तदाधिक्यं ललितमाधवकथायामेव द्रष्टव्यं। पारतन्त्र्यादित्यनेन द्वयो र्मानहेतुकं दुर्ल्लभालोकत्वं व्यावृत्तं पारतन्त्र्यादपादानाद्वियुक्तयोः पारतन्त्र्यरहितयोरित्यर्थः-इति व्याख्या तु न संगच्छते। "दग्धं हतं दधानयेति" तवात्र परिमृग्यते'' त्युदाहरणद्वये तयोः पारतन्त्र्यराहित्यादर्शनात् प्रत्युत पारतन्त्र्यपरमावधित्वमेव तत्कथायामेव दृष्टं। यत्र दत्तशपथापि नववृन्दापि रहस्यं वक्तुं न प्रभवतीति। पारतन्त्र्यादिहेतोः वियुक्तयोरित्यर्थोऽपि नात्र घटते। वियुक्तयोरिति वियोगोऽयं सुदूरप्रवासभवोऽवश्यं व्याख्येय एव। स च सुदूरप्रवासो मथुरागमनरूप एक एव। तत्र पारतन्त्र्यादिति कारणोपादानमव्यावृत्तिकमकिञ्चित्करमिवेति। किंचायं समृद्धिमान् संभोगो लक्षणोदाहरणदृष्ट्या ललितमाधवोक्तकथाक्रमेण प्रकटलीलायामेव तत्रापि सकृदेव भवति। नित्यत्वं त्वस्य प्राक् प्रदर्शितमेव। एवं च सुदूरप्रवासान्ते दाम्पत्ये सत्यपारतन्त्र्ये एव समृद्धिमान्-संक्षिप्त-संकीर्ण-संपन्ना एव औपपत्ये इति व्याख्या प्रसिद्धि र्नैव ग्रन्थकृदाशयस्पर्शिनीति वुद्ध्यते। पारतन्त्र्याभाव एव दाम्पत्य एव समृद्धिमा-

निति यदि तेषामाशयस्तर्हि "सख्यस्ता मिलिता" इति स्पष्टमेव पारतन्त्र्याभावदाम्पत्य निरूपकपदद्वयमनुदाहार्य "दग्धं हंत दधानयेति" "तवात्र परिमृग्यतेति" औपपत्यपारन्त्र्यमयं पदद्वयं कथमुदाहरणत्वेनोपन्यस्तं। तदा हि विवाहप्रसंग एव नास्ति, सूर्य्यदत्ता सत्राजितः कन्यैवाहमित्याभिमानवत्याः श्रीराधायाः श्रीकृष्णे पूर्ववदौपपत्यभाव एव। पारतन्त्र्यस्य तु तदानीं परमावधिः स्पष्टएवेति कियानपन्हवो विधेयः। ननु सख्यस्ता इत्यादौ किमतः परं कर्त्तव्यमत्रास्ति मे इति बृन्दावनेश्वर्य्या वाक्येन पारतन्त्र्याभावमये दाम्पत्ये एवानन्दविशेष एवावसीयते। मैवं तत्रैव तदनन्तरमपि तया पुनश्चोक्तं "या ते लीला पदमरिमलोद्गारिवन्या परिता, धन्या क्षौणी बिलसति वृता माथुरीमाधुरीभिः। तत्रास्माभिश्चटुलपशुपीभावमुग्धान्तराभिः। संवीतस्त्वं कलय वदनोल्लासिवेणुविहारम्" इत्यनेन बृन्दावने गोपपत्नीभिश्चटुलाभिस्त्वमपि अभिसारार्थं वेणुवादनपरः सन् विहारं कुरुष्वेत्येवप्रार्थनायाः सीमानात् तादृशेवापत्ये द्वारकायां मनोऽनुरक्तता जाता। ततश्च श्रीकृष्णेनापि तथा इव इति वरो दत्तः। ननु कथं ग्रन्थकृद्भिः नववृन्दावनेव्रजसुन्दरीणां बिवाहो वर्णितः। यदिव वर्णितः तर्हि कदाचित् कल्पे दन्तवक्रवधानन्तरं तत्रानुक्तोऽपि तासां विवाहोऽस्मद् युक्त्याप्युपमन्तव्य एव स्यात्। सत्यं द्वारकायां तासां विवाहो न निष्प्रमाणक एव, यदुक्तं पद्मपुराणीयद्वात्रिंशदध्यायकार्त्तिकमाहात्म्ये "कैशोरे गोपकन्यास्ता यौवने राजकन्यका" इति। स्कान्दप्रभासखण्डे च गोप्यादिमाहात्म्ये-षोडशैव सहस्राणि गोप्यस्तत्र समागता इति, अतः पूर्णतमस्य बृन्दाबननाथस्यैव द्वारकानाथो यथा पूर्णप्रकाशस्तथैव पूर्णतमाणां तदीयशक्तिणां तासां पूर्णरूपा रुक्मिण्याद्यास्तासां विवाहः समुचित एव। ननु पूर्णतमधाम्नि व्रजभूमौ वर्णयितुं शक्यः समर्थाया एव रतेः समञ्जसत्वापत्तेश्चटुलपशुपीभावमुग्धेत्यादि प्रार्थना प्रातिकूल्याच्च। विशेषश्च उज्वलस्य नवीन-

टीकाया द्रष्टव्य इति दिक्। तस्माद्ग्रन्थकृतामनुसारिणां तेषामपि अयमेवाशयो लक्ष्यते। सवद्दगैश्वर्य्यः श्रुतयोऽपि नित्ये धाम्नि गोपपत्नीपरिवृतं रासविलासिनं श्रीकृष्णं दृष्ट्वैव तासामनुगता भूत्वैवापुरिति तैरेव निर्द्धारितत्वात्। ननु स्मृतमेतत्सर्वं किन्तु कंसवधात् प्राचीनानां लीलानां का गतिः कल्पनीया तदुच्यतां उच्यते तदर्थमपि प्रमाणान्तराणि नान्वेषणीयानि किन्तु भवत्प्रमाणित "न विद्यते यस्य चेत्यादि" पद्ये यस्य चेत्याख्यानमेव। तत्र मत्स्य-कूर्म्म-वराह-वामनादीनां किं पुनः श्रीकृष्णस्य त्रैकालिकीनां सर्वासामेव लीलामात्राणामविशेषेण अप्राकृतत्वे स्वरूपशक्तिप्रकाशितत्वे श्रीभगवत्तत्वतद्धाम्नां च परिकराणां च प्रकाशानन्त्यात् जन्म-कर्म्मलक्षणायास्तस्याथानन्त्ये अनन्तब्रह्माण्डगतत्वेन सर्वदा विराजमानत्वे मनसाथागोचरे स्वरूपानन्दविलासमात्रत्वे सति नित्यत्वं प्रमाणं दर्शयामि। तद्यमर्थ इत्याराप यस्य तु सर्वदा स्वरूपस्थत्वात् मनसाथ गोचरत्वात् प्राकृतत्वानि जन्मादीनि न विद्यन्ते तथापि यस्तानी अच्छति प्राप्नोति तस्मै नम इत्युत्तरश्लोकस्थेनान्वय इत्यादि। ननु प्राप्नोतीत्युक्ते कादाचित्कत्वमप्युपगम्यते तत्राह अनुकालं नित्यमेव प्राप्नोति कदाचिदपि न त्यजति इत्यर्थः। स्वरूपशक्तिप्रकाशितत्वस्य नित्यत्वस्य च मिथो हेतु हेतुमत्ता ज्ञेया। ननु कथं जन्मकर्म्मणोर्नित्यत्वं ते हि क्रिये क्रियात्वं च प्रति निजारम्भपरिसमाप्यामेव सिद्ध्यतीति ते विना स्वरूपहान्यापत्तेः,नैष दोषः भगवति सदैवाकारानन्त्यात् प्रकाशानन्त्यात् जन्मकर्म्मलक्षणलीलानन्त्यात्। अनन्तप्रपञ्चानन्त वैकुण्ठगततत्तल्लीलाकर्म्मणोरथ सा यावत्समाप्यन्ते वा तावदेवान्यत्र प्रारब्धा भवन्तीत्येवं श्रीभगवति विच्छेदाभावात् नित्ये एव ते जन्मकर्म्मणी वर्त्तेते तत्र ते कचित् किञ्चिद्वैलक्षण्येनारभ्येते क्वचिदैक्यरूप्येणेति ज्ञेयम्। विशेषणभेदाद्विशिष्टैक्याच्च एक एवाकारः प्रकाशभेदेन पृथक् क्रियास्पदं भवतीति चित्रं वतैतदेकेन वपुषेत्यादौ प्रतिपादितं।

क्रियाभेदात्तत्त् क्रियात्मकेषु प्रकाशभेदैरप्यभिमानभेदश्च । तथा सत्येकत्रैवात्र लीलाक्रमजनितरसोद्बोधश्च जायते । ननु कथं ते एव जन्मकर्म्मणी वर्त्तेते इत्युक्तं, पृथगारब्धत्वात् अन्ये एव ते उच्यते कालभेदेनोदितानामपि समानरूपाणां क्रियाणामेकत्वं, यथा शंकर-शारीरके "द्विर्गोशब्दोऽयमुच्चारितो न तु द्वौ गोशब्दाविति" प्रतीति-निर्णीतं शब्दैकत्वं तथाहि द्विः पाकः कृतोऽनेनेति द्विधापाकः कृतो-ऽनेनेति प्रतीत्या भविष्यति अतो जन्मकर्म्मणोरपि नित्यता युक्तैव। अतएवागमादावपि भूतपूर्वलीलोपासनाविधानं युक्तं, तथा चोक्तं माध्वभाष्ये—"परमात्मसम्बन्धित्वेन नित्यत्वात्-त्रिविक्रमादावप्युपसंहार्य्यत्वं युज्यत" इति, अनुमतं चैतच्छ्रुत्या "यद्गतं तत् भवच्च भविष्यच्च" इत्यनयैव। उपसंहार्य्यत्वमुपा-सनायामुपादेयत्वमित्यर्थः । तत्तस्य जन्मनः प्राकृतत्वात्तस्माद्विलक्ष-णत्वं प्राकृतजन्मानुकरणत्वेनाविर्भावमात्रत्वं, क्वचित्तदनुकरणेन वा । "अजायमानो वहुधैव जायते" इति श्रुतेः । तथा देवक्यां देवरूपायां विष्णुः सर्वगुहाशय" "सत्यं विधातुं निजभृत्ये"त्यादि च ।

तथा कर्म्मणो वैलक्षण्यं स्वरूपानन्दविलासमात्रत्वं तद्यथा लोकवल्लीलाकैवल्यमित्यादि । ननु एतत्सर्व्वं भवत्प्रमाणितमेव भवत्प्रमाणं किन्तु ललितमाधवोक्तपौर्णमासीगार्ग्योः संवादोदित-भाविकत्वस्य को वा प्रतीकारः ततोऽप्यधिकं सर्वोपमर्द्दकं विदग्ध-माधवे पौर्णमासीनान्दीमुख्याः संवादेऽभिमन्युना विवाहस्य मिथ्यात्वमेव निश्चित्य एतत्पक्षस्य मूलोत्खात एव कृतोऽस्ति तत्राप्युपायश्चिन्तनीयः । नोचेद्वर्णितचर्य्यपि सा लीला मायिकत्वे पर्य्यवस्यति एव ग्रन्थकृद्भिस्तथात्वे स्वस्याभिमतस्य निश्चितत्वात् अत्र ब्रूमः श्रीमद्ग्रन्थकृद्भिस्तत्र "णूणं गोअ णादि गो एहि चंदा अली प्पहुदीणं उचाहो मा आप निच्चाहिदो" इत्येवोक्तं । ननु भ्रमादिशब्देन मिथ्यार्पितं वा न च मायाशब्दस्य वहिरंगायाः

शक्तेरेव वाचकत्वेतिवाच्यं, श्रीभगवत्सन्दर्भे "न विद्यते यस्य चेति" पद्यव्याख्याने मायायाः स्वरूपशक्तित्वे प्रमाणितत्वात्। तद्यथा-स्वरूपभूतया नित्यशक्त्या माया इत्याख्यया युतः। अतो मायामयं विष्णुं प्रवदन्ति सनातनमिति" श्रुतेः। "आत्ममाया तदिच्छा स्यादिति" संहितातः। "त्रिगुणात्मिकाज्ञानं च विष्णु-शक्तिस्तथैव च। मायाशब्देन भण्यन्ते शब्दतत्त्वार्थवेदिभिरि" ति शब्दमहोदधिः। माया वयुनं ज्ञानमिति निघंटोरित्यादि। ततश्च दुर्घटघटणापटीयस्या योगमायया उद्वाहनिर्वाहस्तया "देवक्यां देवरूपिण्यां विष्णुः सर्वगुहाशयः। आविरासीद्यथा प्राच्यां दिश्यु-डुराजपुष्कल इति वद्बोद्धव्यः। प्रस्तुते च जगन्निस्ताराय श्रीकृष्णस्य यशो विस्ताराय च लीलाग्रन्थस्तादृशै महाकारुणिकैर्वर्णितः। सा चेत् अपरामर्शान्मायात्वं कल्प्यते तर्हि तेषु विप्रलिप्सुतां लीलायामसत्यतां च समारोप्य ऐहिकामुष्मिकं कल्याणं स्वस्य साधनीयमेव वादिभिः ततः स्वरूपशक्तिप्रकाशितत्वात् सर्वास्ता लीला नित्या एवेति सर्वं सुस्थं। किञ्च विदग्धमाधवस्थ-पौर्णमासी-नान्दिमुख्योः संवादे-"णांदी भअवदि जसोदा धत्ती ए मुहराए अत्तणोणत्तिणी राहि आगोउलमज्जे आणि अजडिला पुत्तस्य अहिमण्णो हत्थे उव्वाहिदलिय णाणूणं तु मणिच्चिसि संवुत्ता, जंएसा गोउल मज्जे आणीदा" इत्यादेरेव पाठः। नत्वन्य इतोऽ-प्ययिकस्तथैव ग्रन्थकृतां श्रीहस्तलिखितपुस्तकेषु दृष्टत्वात् अद्यापि तानि पुस्तकानि श्रीमन्मदनगोपालगोविन्ददेवराधादामोदराणां पुस्तकागारेषु अन्यत्रापि विराजन्ते। तस्मात् "उव्वाहिदलिय इतः परंतु मणिच्चितावित्रदीसन् पौर्णतरयैवहेतोः नांदीकर्धविञ्च पौर्ण-विहस्य" तद्वचनार्थमेव योगमायया मिथ्यैव प्रत्यायितं तद्विधाना-मुद्वाहादिकं नित्यप्रेयस्य एव खलु ताः कृष्णस्य नांदी सहर्षमि-त्येतत्पर्य्यन्तं केनचित् स्वाभिमतप्रतिपिपादयिषयान प्रक्षिप्य मिथ्यैव प्रत्यायितमिति। तेन प्रक्षिप्तपाठेन न शंका पंकिला विधा-

तन्या स्वधीः सुधीभिरित्येवधेयम्। परं च यदन्यमेव पाठः प्राचीनपुस्तकस्थोऽभविष्यत् तदा ललितमाधवीय चंद्राअलीप्य हृदीण उब्बाहो माया एणिच्चाहिदो इत्येव सर्वत्र स्वग्रन्थेषु तैः प्रमाणितं। अमुमपि विदग्धमाधवप्रसंगमत्यन्तसुस्पष्टं मिथ्यावाचकत्वे तेऽवश्यं प्रामापयिष्यत् इत्यपि परामृश्यंयदाहुः यदि स्वयं श्रीकृष्णेन सा लीला अवतारावसर एव दिनानि कतिचित्कस्मैचिदास्वादविशेषाय सर्वज्ञतां सर्वशक्तितां सर्वेश्वरतामपि अनादृत्य तदुपयुक्तां लीलाशक्तिमेवादृत्त्यावतारितानां नित्यप्रेयसीनां तासां परदारत्वभ्रमेण यथा रसस्य विधिः प्रकारविशेषः संभवति तथा नित्यलीलां विस्मार्य्य प्रकटीकृतानामित्यादि, तत्रापि एतदुक्तं भवति यद्यपि निर्विघ्नेऽपि संभोगे रसता भवत्येव तथापि "न विना विप्रलम्भेन संभोगः पुष्टिमिष्यत" इति भरतन्यायेनापेक्षित विप्रलम्भश्च तल्लीलावैचित्र्यमुद्वहन् भवति वैचित्री च जायापत्योरितः परं नास्ति। यज्जायापत्योरेव सतोर्लीला शक्त्या जन्मान्तरवशाद्विस्मृततद्भावयोर्मिथ्यैवान्यत्र प्रत्यायित जायाविवाहयोर्याप्रतिकृतिकल्पनाश्रावचिते पतिम्मन्ये लोकधर्म्ममर्य्यादां समुल्लंघयन् केन रागेण रहसि परस्परमिलितयोर्निरन्तरशंकया जातदौर्लभ्ययोः कदाचिज्जाते पत्युस्तु दूरप्रवासे मिलनयुक्तिमसंभावयतोस्ततो जातेऽपि कथमपि संभोगे लीलाशक्त्यैव व्यञ्जितदाम्पत्ययोः परमसुखचमत्कार इति च, कृष्णसन्दर्भे च न च दाम्पत्ये प्रकटे "वहुवार्य्यते" इत्यादि भरताद्यनुसृतनिवारणाद्यभावाद्रसनिष्पत्तिः न स्यादिति वाच्यं। तस्य निवारणं खलु भयेन तावत्सर्वातिशयसामर्थ्यात्र किंतु लज्जयैव। लज्जा च कुलकुमाराणां स्वस्त्रीसम्बधानुमितावपि जायते। किमुत परमलज्जादि-गुणनिधानस्य व्रजे नववयः शीलतामेवाव्यञ्जतस्तस्येति। किन्तु बहु पत्नीकत्वे मात्रादिभिर्मिथस्ताभिरपि संगस्यानभीष्टत्वात् स्वतएव निवारणं प्रच्छन्नकामुकत्वं च स्यात् इत्यादि। अत्र वदामः आदौ "नेष्टा यदङ्गि-

नी"त्यस्यार्थो ग्रन्थकृदभिमतो यथा-शृङ्गाररसे पापादि श्रवणा-शंकया परोढा नेष्टा तत् गोकुलाम्बुजदृशां कुलं बिना ज्ञातव्या। कुतः रसिकमण्डलशेखरेण कंसारिणा अवतारितानां प्रकटीकृतानां केन हेतुना अत्र रसे यो विधिः प्रवर्त्तना तस्य आ सम्यक् स्तुत्या हेतुना प्रकटाप्रकटयोर्ल्लीलायाः स्थिनित्वं ऐकरूप्यं पूर्वमुक्तमेव। अयमर्थः पूर्वं कोऽपि संसाराद्युत्तितीर्षुरिमं शृङ्गाररसं नास्वादयत संप्रति तु एतत्संबधात् याः श्रुत्वा तत्परो भवेदिति विधिश्च शुकदेवेनापि जीवमात्र प्रतिविहितत्व निकृतकृत्या भोश्चरितार्थाः प्रकृतं शृणुत यस्य लीला क्रमसाध्या प्रेमरसविशेषस्यास्वादनाय नित्यसिद्धानि स्वज्ञतादीन्यनादृत्य विस्मार्य्य च प्रेयसयोऽवतारिताः स्वयं च तथा सन्नेवावतीर्ण स एव नियासत्वेन मुहुर्निर्दिष्टः तथैव तत्परिपोष इत्यपि निद्धारितः किंच लीलावैचित्र्यं च जायापत्योरिव सतो लीला जन्मान्तरवशाद्विस्मृततत्तद्भावयोर्मिथ्यैवान्यत्र प्रत्यायित जायाबिबाहयोर्द्धर्मनिर्वाहोत्तरं महाप्रबासानन्तर - समृद्धिमति संभोगे च जाते सति लीलाशक्त्यैव वा श्रीकृष्णसन्दर्भोक्त आकाशादिबाण्यामन्यादिना देव्या व्यञ्जितदाम्पत्ययोः पुन व्रजे बिबाहे निष्पन्ने परमसुखचमत्कार इति च निरनायि। स एव पुनः लीलाशक्तिप्रेरितोऽपि मिथ्यात्वेन प्रतीत इत्य शुच्यते। तत्रैवं प्रष्टव्याः स्थः तस्य स्वस्य वा नित्यदाम्पत्यादीनां विस्मृतिः किं लीलाशक्तिनिष्पाद्या, जीववत् अज्ञानकल्पिता अविद्या कार्य्यरूपा वा। अथवा स्वेच्छयैव रसनियासास्वादनायांगीकृता। नाद्यः पक्षः लीलाशक्तेः स्वरूपशक्तित्वात् स्वरूपशक्तिप्रकाशितत्वस्य हेतुमत्तेति सन्दर्भोक्तं पूर्वमेव लिखितत्वात। तत्कृतविस्मृतेर्न कदाप्यनित्यतेति सिद्धान्तितत्वात्। किंच प्रीतिसन्दर्भोक्तभगवतो विभुत्वादिविस्मृतिहेतुर्मातृभावप्रेमानन्दावृत्तिविशेषः अतएव गोपीजनाविद्याकलाप्रेरक इति गोपालतापनीश्रुताविति पूर्वमेव प्रदर्शितं च मातृभावादि तत्कृतं सत्यं स्यादत्रापि कृष्णे तासामुपपतिभावः। तासु

श्रीकृष्णस्य परकीयाभावश्च सत्यो न भवति मायिकमिति कथं वक्तुं शक्यमिति तैरपरामृश्यं। नापि द्वितीयः ईश्वरे अविद्ययाऽज्ञानकादिकस्य सम्बन्धस्य शंकरशारीरकादावप्यनुक्तत्वात्। तत्रापि स्वयं भगवति तत्रापि वैष्णवैः तथा वक्तुमनर्हत्वात्। नापि तृतीयेऽपि भवदभिमतसिद्धिः। यतोऽन्यासु सर्वासु एव लीला स्वरुच्या रसस्य सारांशस्य स्वादनाय अर्थात् स्वयमास्वादयितुं विशेषतोऽर्वाचीनभक्तान् तस्यास्वादनायाः पात्रीकर्त्तु मुरीकृत्यायास्तस्याः कदाप्यरुच्याऽसंपृक्तायाः श्रीभगवत इच्छाशक्त्यैव निष्पादितायाः पूर्वोक्तयुक्तेरेव मायात्वे सात्वतैर्गिरां गोचरीकर्त्तुमयोग्यत्वात्। न च ब्रह्ममोहनकालीनलीलावेशवदयमपि वाच्यः। तत्रापि ब्रह्मणाधिकृतभक्तत्वे ऐश्वर्य्यप्रधानत्वात् यथा परिवारप्रसंगं श्रीभगवतोऽपि तदनुरूपस्यैश्वर्यादेरेवावश्यकभावित्वात् प्रस्तुते तु माधुर्य्याविष्टयोः सर्वथा ततो निष्क्रान्तेरनर्हत्वात्। उत एवायं लीलावेशः प्रेमाधीन एव। तथात्वे विनिगमकेऽप्रकटे किं प्रेमाभाव एव यतस्तत्रानावेशः। अवतारलीलायामेवस्यादिति। अतोऽत्र लीलावेशशब्देन भवता तदज्ञानमेवोच्यते। तेन विस्मृततत्तद्भावतेति तत्कृताध्यासेन स्वरूपास्फूर्त्तिः। यथा जीवस्य देहावेशादहं सुखी दुःखी कृशः स्थूलश्चास्मि इतिविपर्य्यासस्तथा प्रकृते परस्परान्यदीयत्वभावनाद्गुरुजनकृतवारणादिना कदाचित समयेऽनवाधाभीष्टतया नानक्लेशभाक्त्वं अतएव स्वप्नवत् यथावसरमतो दूरीभविष्यत्येवेति भवदभिप्रायो बुद्ध्यते। परं तु जीवस्य स्वतोऽज्ञानध्वंसः कुत्रापि न प्रथितः श्रवणमननिदिध्यासनादिनाऽथ च महावाक्यानामुपदेशेन च यदा तत्वमस्यादिना सोऽहमस्मीति स्वरूपस्फुर्त्त्या अज्ञानध्वंसः स्यात्तदैवात्यन्तिकदुःखहानिः सुखावाप्तिश्च जायते एषैव मोक्षत्वेन भण्यते। अत्र तु तस्य च तासां च न किंचनोपदेशवाक्याश्रयीभूतं शास्त्रं दृश्यते। न कश्चिदुपदेष्टा न च श्रवणमननादिश्च तत्केनोपायेन ततोऽज्ञानबंधान्मुक्ता इति

चिन्तयमानोऽस्मि । न च द्वौ वक्तारौ उपदेशग्रन्थश्च मया विख्यापिता एवेति वाच्यं तेषामर्वाग्भवत्वात् तत्र प्रमाणाभावाच्च तदुपयोगिताया अभावात्। नहि मायावादिनां मतेऽपि यद्यपि सर्वेषां व्यवहारमार्गाणामेवासत्यत्वं तथापि ब्राह्मणादीनां यस्य यत्र यादृशो व्यवहार समुचितो निर्व्यूढोऽस्ति तमन्यथा कृत्वा यस्य कस्यचित् स्त्र्यादियेनकेनचित् गृहीतं गृह्यते वा तस्मात्तादृशेभ्योऽप्ययं बिलक्षणो नवीन एव पंथाः। न वायं न वा नित्यलीलायां दाम्पत्यमेव अवतारलीलायामपि दंतवक्रबधानंतरं तदेवेति वाच्यं। प्रकटाप्रकटयोरपि परकीयत्वेन पूर्वप्रमाणितानां सन्दर्भस्य व्याख्यानानामेव जागरूकत्वात्। गोपीनां तत्पतीनां चेत्यत्र। अत्र या गोपपत्न्यश्चेत्यत्र च नहि भवदभिमते उद्वाहे किञ्चिदपि प्रमाणमस्ति चेदार्षं तत्स्याद्भवता किं नोत्थापितं स्यात् प्रयुत दन्तवक्रबधानन्तरागमनप्रसंगे पद्मपुराणीयपद्येषु भवत्प्रमाणितेषु परकीयत्वस्यैव निश्चयो निष्पद्यते तद्यथा 'कालिन्द्याः पुलिने रम्ये पुण्यवृक्षसमाचिते। गोपनारीभिरनिशं क्रीडयामास केशवः। रम्यकेलिसुखेनैव गोपवेशधरः प्रभुः। बहुप्रेमरसेनात्र मासद्वयमुवास ह" ति। गापानां नारीभिरित्येव बाक्यस्यावश्यं निर्वचनीयत्वात्। तृतीयस्कंधे शुकदेववचने देवहूतिनृपवधूरितिवत् इति व्याचक्षानेन तेन स्वेनैव कृष्णवध्व इति स्वप्रमाणितं प्रत्याख्यातं। पुनर्गोपनारीभिरनिशमित्यत्र तेषां पत्नीभिरिति दृष्टं विधाय अनिशक्रीडादाम्पत्यहेतुत्वेन गम्यमानतयोक्ता। अनया तु न त्वन्यत् प्रमाणमस्तीति ज्ञापितं एवं च द्यूतक्रीडा भगवता कृता गोपगणैः सह। पणावहासरूपेण जिता गोप्यो धनानि च। गोपैरानीय तत्रैव कृष्णाय विनिवेदिता इत्यादि वाराहीयपद्यं चम्पूस्थं गोपानां भार्य्यात्वेना सुखत्वापत्तौ च प्रमाणतायां निष्पन्नं। न तु भवदभिमते दाम्पत्ये साधकतायामिति यतः पणहेतुको योऽवगतो हासस्तेन रूपेण जितानां न तु वैरेण, ग्लहजितानां अन्यदीयानां

पत्नीनां विवाहाजेतृभिः कुत्रापि केनाप्यदृष्टा श्रुतत्वात्। चेदेवमभविष्यत्तदा ते गोपादयः सर्वे एव तदीया कर्मकरा अभविष्यन् प्रकृते न तथेति विचार्य्यं। न च दाम्पत्ये प्रकटे बहुवार्य्यते इत्यादिभरतानुसृतनिवारणाभावाद्रसनिष्पत्तिश्च न स्यात् इत्यादिना किंतु बहुपत्नीकत्वे मात्रादिभिर्मिथस्ताभिरपि सतत संगस्यानभीष्टत्वात् स्वत एव निवारणं प्रच्छन्नकामुकत्वं च स्यादित्यंतेन भरतमतानुसारिणां प्राचां वाचमवधीरितं उदीरिता चैषैव निवारणा। तत्र मात्रादिभिः प्रेयसीभिश्च कर्त्तीभिरित्येकाधिकरणकनिवारणं न्यायप्राप्तमेकवासनाकं स्यान्नवेति त एव प्रष्टव्याः नन्वयुक्तं कथं प्रायस्तुल्यं मात्रादिभिरित्यादिग्रहणात् पित्रापितृव्यैस्तत्पत्नीभिर्मातृष्वस्रादिभिश्च कार्श्याद्यांशकया वात्सल्येन सपत्नीभिस्तु सापत्न्येनेति विवेचनीयं। सत्यं एवमपि मातरपितराभिर्वात्सल्यरसनिमग्नैरत्र निवारणे यादृशो रसस्य परिपोषः सतु भक्तिरसामृतसिन्धुवेदिभिरसिकैरेव विवेचनीयः अथ च श्रीकृष्णस्य लज्जालुतया निवृत्तिपरत्वं मात्रादीनां तन्निवारणरतत्वं च तदन्यैः कैश्चिदपि कुत्रापि श्रीभागवते भक्तिशास्त्रादिषु च नाद्याप्युपलब्धमित्यनुलापेन। ननु स वो हि स्वामी भवतीति गोपालतापण्यां आर्य्यपुत्रोऽधुनास्ते इति दशमस्कन्धे गोपीनां पतिरेव वा इति बृहद्गौतमीये चेति प्रमाणानि सन्त्येव। तत्कथं न सन्तीत्युच्यते। सत्यं गोपालतापन्यां हि उत्तरार्द्धे–एकदा हि व्रजस्त्रिय इत्यारभ्योपक्रमोपसंहाराभ्यां प्रच्छन्नकामताया एव निश्चयात् स्वामी भवतीत्यस्य उपभोक्तृत्वलक्षण ऐश्वर्य्यत्त्वे एव संगच्छते। कृष्ण एव युष्माकं रूपयौवनादिनामुपभोक्तृत्वे स्वामी न तु वोढार इत्येव मुनेराशयात्। न च दन्तवक्रबधानन्तरं कुत्रचिद्वर्णितविवाहपरमिदमिति वाच्यं। मुनिना लृढं विहाय वर्त्तमानप्रयुक्तत्वात्। न वा नित्यदाम्पत्यं मनसि विधाय तथोक्तं इत्यपि वक्तव्यं दाम्पत्ये प्रमाणाभावात्। पूर्वयुक्तयुक्तिभ्यश्च तैरेव परोढौपपत्ययोरेव नित्येऽवतारे

च निश्चितत्वात्। आर्य्यपुत्र इत्यत्रापि व्रजराजस्य आर्य्यत्वे सारल्येनैवास्माकी विपत्तिरिति सारल्यवाचित्वे एव तथोक्तिः संगता भवति। न च भावि दाम्पत्यसूचकमेतदिति वक्तुं शक्यं। स्वकृत इह विसृष्टाः पत्यपत्यान्यलोका इत्यादिना तत्प्रकरणे मुख्ययैव स्पष्टीकृतत्वात् भाविनि प्रमाणान्तराभावात् च। गोपीनां परिरेव वा इत्यस्याप्यर्थः पतित्वे उपपतित्वे च वाच्ये पतिशब्दस्य प्रयुक्तत्वे एव संघटते। देवेषूपदेवेषु पूज्येषु देवाः पूज्या इतिवत्। अन्यथा गोपी इत्यस्य ङापपुंयोगादाख्यामिति पाणिनिस्मरणात् पुंयोगादेव प्रत्ययो जातोऽस्ति। तथा सति विरुद्धमतिकृद्दोषो दुर्निवार एव स्यात्। स तु जुगुप्सापर्य्यवसायी। न च जातौ ङाप इति वाच्यं जातिरिति सिद्धे एतत्सूत्रस्य विशेषत्वे पर्य्यवसानात् गोविन्दवृन्दावननाम्नि बृहद्गौतमीये श्रीकृष्णेण श्रीमुखेनैव "अत्र या गोपपत्न्यश्चेत्या"दिना तासां गोपानां पत्नीत्वेन सुनिश्चितत्वात्। तदाज्ञाहेलनान्निरयपातभीतेश्च सर्वथान्यथा वक्तुमनर्हत्वात् विशेषतः सिद्धान्तकौमुदी-भाषावृत्ति-संक्षिप्तसार-मुग्धबोधादिषु पुंयोगादित्यस्योदाहरणत्वेन गोपीपदस्यैव गृहीतत्वाच्च। एवं गौतमीये गोपालस्तवराजे गोपनारीभिरावृतमित्यत्र क्वचिद्गोपांगनावस्त्रहारिणमित्याद्यन्यत्र च पत्नीत्वे एवोक्तत्वाच्च तस्मात् परमधीरेषु तादृशेषु अज्ञैरेव स्वकीयापक्षपातीति दोष आसज्यते। भक्तिसन्दर्भे रागानुगाप्रकरणे भगवत्सन्दर्भे श्रीकृष्णसन्दर्भे गोपालचम्पूमध्ये च परकीयत्वनैव प्रकटाप्रकटयोरपि मुहुर्मुहुस्तैरेव सुनिश्चितत्वात्। दन्तवक्रवधानन्तरप्रसंगे श्रीदशमटिप्पण्यां प्रकटाप्रकटयोरैक्येनैव सुप्रथितत्वाच्च। अतएव उज्ज्वलनीलमणिटीकायां लघुत्वमत्र यत्प्रोक्तमित्यत्र यत् स्वेच्छापरेच्छालिखनयोः पूर्वापरसम्बन्धत्वासम्बन्धत्वे स्वाशयः प्रकटीकृतः सोऽप्युपलक्षणत्वे [illegible]त्र ग्रन्थेषु बोद्धव्यः। अतः पूर्वापरसम्बन्धानि व्याख्यानानि तदीयस्वेच्छाकृतानि अन्यानि तु परेच्छाकृतानीत्यवधेयम्। अस्मा-

भिस्तूभयथा निर्दोषत्वे एव प्राचीनसम्मतत्वे च ग्रहीतव्यानीत्यपि ध्येयमिति। तत्र कारिका पूर्वं लिखितैव, श्रीगोपालचम्पूमनु च ग्रन्थान्ते कारिका यथा—"प्रायः सर्वा हरेर्लीलाः क्रमशः सूचिता मया। यथारसं लब्धरुचिभिरास्याद्यन्तां महात्मभिरिति।" उज्वल-व्याख्यानानि यथा-रागेणैवार्पितात्मान इत्यत्र अन्तरंगेण रागेणै-वार्पितात्मानो न तु वहिरंगेण विवाहप्रक्रियात्मकेन धर्म्मेण। तदेवं मिथुनीभावे तासां रतिमुक्त्वा श्रीकृष्णस्याप्याह-धर्म्मेण विवाहात्म-केनैवास्वीकृता रागेण तु स्वीकृत इत्यर्थ इति। रतिप्रकरणे"साधारणी निगदिता समञ्जसासौ समर्था च। कुब्जादिषु महिषीषु च गोकुलदेवीषु च क्रमत" इत्यत्र तथाहि समर्था खलु सैव स्यात् या लोकं धर्म्मं चातिक्रम्य परमकाष्ठामापन्ना पुष्टिमाप्नोति। तदुक्तं परकीयाल-क्षणे—"रागेणैवार्पितात्मानो लोकयुग्मानपेक्षिणेति" वक्ष्यते च "इयमेव रतिः प्रौढा महाभावदशां व्रजेदिति"। अथ यान्या रतिः समंजसाख्या सा खलु लोकधर्म्मापेक्षया तथोच्यते। अतएव नाति समर्था तत एव च निबारणादिनाऽपि भावान्तिमां सीमां न प्रप-द्यन्त इति भावः। समञ्जसालक्षणे—"पत्नीभावाभिमानात्मा गुणादिश्रवणादिजा। क्वचिद्भेदितसंभोगतृष्णा सान्द्रा सम-ञ्जसा।" पत्नीभावेति लोकधर्मापेक्षिता दर्शिता। पत्नीभावाभिमान एवात्मेबात्मा यस्या इति तदभिमानस्य तिरस्कारे समर्थाया इव स्थित्यभावश्च व्यक्त इत्यादि। गुणादिश्रवणादिजा तत्प्रादुर्भूते-त्येवार्थः। नतूत्पद्यमानेति "जनी प्रादुर्भावे" इति धातुपाठात् इति। महाभावत्वं "अनुरागः स्वसंवेद्यदशां प्राप्य प्रकाशितः। यावदाश्रयवृत्तिश्चेद्भाव इत्यभिधीयते।" एतद्व्याख्यायां-अयंभावः "रागः खलु दुःखमप्यधिकं चित्ते सुखत्वेनैव व्यज्यते। यतस्तु प्रणयोत्कर्षात् स राग इति कथ्यते" इत्युक्तलक्षणः दुःखस्य च पराकाष्ठा कुलबधूनां स्वयमपि परमसुमर्य्यादीनां स्वजनार्य्यपथाभ्यां भ्रंश एव नाग्न्यादि न च मरणं ततश्च तत्तत् कारितया प्रतीतोऽपि

श्रीकृष्णसम्बन्धः सुखाय कल्पते चेत्तर्ह्येव रागस्य परमेयत्ता ततश्च तामाश्रित्यैव प्रवृत्तोऽनुरागो भावाय कल्पते। सा चारम्भत एव व्रजदेवीष्वेव दृश्यते, परमहिषीषु तु सम्भावयितुमपि न शक्यते आरम्भत एव इति व्यंजयितुं नवरागहिंगुलभरैरित्यत्र नवशब्दो दास्यते। तदेवमेता एवोद्दिश्य उद्धवः स चमत्कारमाह "या दुस्त्यजं स्वजनमार्य्यपथं च हित्वा" इति। इदृशोक्त्या च यद्यपि तासां तत्त्यागो न भवति तथापि कृत इति कुलांगनात्वं परममर्य्यादात्वं च दर्शितं। तस्मात् समर्थाख्यैव रतिरनुरागदशामारूढ़ा सती महाभावदशामाप्नोतीत्येतानि। अनेन महाभावस्वरूपेयमिति ग्रन्थकृतां हार्द्दमेव स्वहार्द्दं विधाय व्याख्यानाज्ज्ञापितं। श्रीराधिकात्र रसे आलम्बनरूपा सा चेदीदृशत्वेन निश्चित्योपास्या स्यात्तर्ह्येव रसः सालंबः नोचेदालम्बनवैरूप्याद्वैरस्यादन्येषां मूलोत्खात एव। किंच गोपालचम्पूमध्ये च सर्वत्रैव परकीयात्वस्यैव वर्णनं विशेषतः षड्विंशतिमे पूरणे रासमारभ्य त्रिंशत्पूरणपर्य्यन्तं अशेषतया तस्यैव श्रीभागवतरीत्या विस्तारतस्तदेवास्तीति। विशेषतः समृद्धिमत प्रघट्टके सप्तपत्रीलिपेः शेषे तु अतीव सुव्यक्ततया सर्वोपमर्द्दकः समग्रग्रन्थस्य निर्गलितार्थः स्वाशयसारः सिद्धलेखः कृतोऽस्ति। यथा-परमरसपरिपाकस्तु क्रमलीलायामेव क्रमते। श्रीभागवतादिप्रकाशकप्राचीनभक्तानां विदग्धमाधवादिप्रकाशकतादृशग्रन्थकृतां चात्रैवावेशदर्शनात्। अत्रैव ग्रन्थे अस्या एव निर्वाहणादिति। तस्मात् ये रागानुगीयानुगामिनो बुभूषन्ति तैरन्तरंगव्याख्यानुगतैर्भवितव्यं। तैः सहैवालापः समुचितो नोचेदन्यैरलं संलापेन। माधवमहोत्सवनामस्वकृतग्रन्थे दानकेलिकौमुद्यनुसारिणि उपक्रमोपसंहारपरकीयात्वेनैव सर्वं वर्णितं दिग्दर्शनं यथा-काभिश्चित् पटु जटिलां विकृष्यमाणां नर्द्दतीं दधिघृतकर्द्दमेषु राधा। श्वश्रूं सा महसि निशाम्य नम्रवक्त्रा स्मेरत्वं जनहसविंबमाशु दध्रे। इत्याद्या बहव एव। तस्मात् सर्वथा तेषामाशय एष एव ज्ञातव्यो नान्यः कदाचिदपीत्यलं विस्तरेणेति दिक्। ग्रन्थसंख्या ७००॥श्रीरस्तु।

## परकीयारसोत्कर्षे प्रमाणानि

जारधर्म्मेण सुस्नेहं सुदृढं सर्वतोऽधिकं ।
मयि संप्राप्य सर्वेऽपि कृत्यकृत्या भविष्यथ ॥

बृहद्वामने—धृतविट्ठलमण्डने विट्ठलेशपादाः

परभावेन यः संगस्तच्चातीव सुखं मिथः ।
मयैव कल्पितं तच्च योगमायाबलम्बिना ॥

—भविष्ये राधाव्रतप्रसंगे

अतः—परकीया भावे हय रसेर उल्लास ।
व्रज बिना अन्यत्र नाइ इहार प्रकाश ॥

—चैतन्यचरितामृते

बहुवार्य्यते यतः खलु यत्र प्रच्छन्नकामुकत्वं च ।
या च मिथो दुर्ल्लभता सा मन्मथस्य परमा रतिः ॥

—भरत मुनिः

यत्र निषेधविशेषः सुदुर्ल्लभत्वं च यन्मृगाक्षीणाम् ।
तत्रैव नागराणां निर्भरमासज्यते हृदयम ॥

—विष्णुगुप्तसंहितायाम्

वामता दुर्ल्लभत्वं च स्त्रीणां या च निवारणा ।
तदेव पञ्चवाणस्य मन्ये परममायुधम् ॥ —रुद्रः

अनन्यशरणा स्वीया पराहार्य्या परांगना ।
तस्यास्तु केवलं प्रेमा तेनैषा रागिणीमता ॥

—शृङ्गारतिलके

तुहु यदि कहसि करिया अनुषंग ।
चौर पिरीति होय लाख गुण रंग ॥
सु पुरुख ऐछन नाहि जग माझ ।
आर ताहे अनुरत बरज समाज ॥

विद्यापति कहे इथे नाहि लाज।
रूप गुण बति का इहा बड़ काज॥

—विद्यापति चरणाः

परकीय धन सकलि प्रधान यतन करिया लई।
नैष्ठिक हइया भजन करिले पद्धति साधक हई॥
पद्धति हइया रस आस्वादिया नैष्ठिके प्रवृत्त हय।
ताहार चरण हृदये धरिया द्विज चण्डीदास कय॥

—चण्डीदास पदावली

रति परकीया याहारे कहिया से इ से आरोप सार।
भजन तोमारि रजक भियारीरामिणी नाम जाहार॥
बाशुली आदेशे कहे चण्डीदासे सुनह द्विजेर सुत।
ए कथा लबे ना ना जाने ये जना सेइ से कलिर भूत॥

—चण्डीदास पदावली

प्रच्छनोऽन्यः प्रकाशोऽन्यः कृत्रिमाकृत्रिमावुभौ
सहजाहार्य्य नामानौ परौ यौवनजोऽ परः।
विश्रम्भजश्व प्रमाणो द्वादशेति महद्धयः॥

—सरस्वती कण्ठाभरणं

## अप्राकृते श्रीकृष्णस्य परकीया भावस्य सर्वोत्तमत्वे प्रमाणानि

नेष्टा यदगिंनिरसे कविभिः परोढ़ा
स्तद्गोकुलाम्बुजदृशां कुलमन्तरेण।
आशंसया रसविधेरवतारितानां
कंसारिणा रसिकमण्डलशेखरेण॥

—धृतोज्वलनीलमणौ प्राचीनबाक्यं

लघुत्वमत्र यत्प्रोक्तं तत्त प्राकृतनायके।
न कृष्णे रसनिर्य्यासस्वादार्थमवतारिणि॥

—उज्वलनीलमणौ

यत्परोढ़ोपपत्यस्तु गौणत्वं कथितं बुधैः।
तत्तु कृष्णं च गोपीश्च विनेति प्रतिपद्यतां ॥

—नाटक चन्द्रिकायां

नासौ नाट्ये रसे मुख्ये यत्परोढ़ा निवध्यते।
तत्तु स्यात्प्राकृतक्षुद्रनायिकाद्यनुसारतः ॥

—उज्ज्वलनीलमणौ

अप्राकृते तु परोढ़ारमणीरतिरेव सर्वोत्तमतया भूयसी श्रूयते। न तस्यामनौचित्यप्रवर्त्तितत्वं अलौकिकत्वं तु सिद्धे भूषणमेव न तु दूषणमिति न्यायात्तर्कागोचरत्वाच्च ॥

—अलंकारकौस्तुभे।

## परकीयाभावसम्बन्धिनि प्रमाणानि

यथा प्रकटलीलायां पुराणेषु प्रकीर्तिता।
तथा ते नित्यलीलयां सन्ति बृन्दाबने भुवि।
गमनागममे नित्यं करोति वनगोष्ठयोः।
गोचारणं वयस्यैश्च बिनासुरबिघातनं ॥
परकियाभिमानिन्यस्तथा तस्य प्रियाजनाः।
प्रच्छन्नेनैव भावेन रमयन्ति निजप्रियं ॥ अ० ५२

—पाद्मे पातालखण्डे बृन्दाबनमाहात्म्ये

राधाद्यास्ताः परमभगबत्यस्तु पत्यात्मजादीन्
लोकान्धर्म्मान् ह्रियमपि परित्यज्य भावं तमाप्ताः ॥

—बृहद्भागवतामृते २।५।१४७ श्लोकं

## ब्रजलीलायां—आदौ राधिकायाः

इत्थं श्री राधिकादेवी प्रादुर्भूता धरातले।
मन्मायामोहितमतिर्नात्मानं वेत्ति कर्हिचित् ॥
मामेव पतिमिच्छन्ति भानुपूजां दिने दिने।
करोति सखीभिः सार्द्धं पुण्ये गोवर्द्धने गिरौ ॥

वृषभानुर्ददौ कन्यां राधां मत्वाभिमन्यवे ।
मन्मायाकल्पितं तच्च न वेत्तीयमपि स्फुटं ॥
अन्ये कुतो न जानन्ति मम मायाविजृम्भितं ।
तदैषा परकीयाहमिति मत्वा मनस्विनी ॥
भीता गुरुभ्यो रहसि मया क्रीडति निष्कुटे ।
परभावेन यः संगस्तच्चातीव सुखं मिथः ।
मयैव कल्पितं तच्च योगमायावलम्बिना ।
दाहशक्तेर्यथावन्हेस्तथैषा मम वल्लभा ॥
अनया सह विच्छेदः क्षणमात्रं न विद्यते ।
तथा च रसपोषाय प्रकटस्यानुसारतः ॥
करोमि लीलामतुलां योगायोगविरुद्धनाम् ।

—भविष्यपुराणे राधाष्टमीव्रतप्रसंगे

ततः सखीजनैस्तस्याः श्वश्रुं संप्रार्थ्य यत्नतः ।
कर्त्तुमाहूयते देवि पाकार्थं तु यशोदया ॥
नारदोवाच—कथमाहूयते देवी पाकार्थं तु यशोदया ।
सतीषु पाककर्त्रीषु रोहिणीप्रमुखास्वपि ॥
वृन्दोवाच--पूर्वं दुर्वाससा दत्तो वरस्तस्यै महामुने ।
इति कात्यायनीवक्त्राच्छ्रुतमासीन्मया पुरा ।
त्वया यत्पच्यते देवि तदन्नं मदनुग्रहात् ।
मिष्टं स्यादमृतस्पर्द्धि भोक्तुरायुस्करं तथा ।
इत्याह्वयति तां नित्यं यशोदा पुत्रवत्सला ।
आयुष्मान्मे भवेत्पुत्रः स्वादुलोभात्तथा सती ॥
श्वश्रानुमोदिता सापि हृष्ट्वा नन्दालयं व्रजेत् ।
ससखीप्रकरा तत्र गत्वा पाकं करोति च ॥ ५२ अ०

--पद्मपुराणे पातालखण्डे वृन्दावनमाहात्म्ये

तत्रैव--सापि कृष्णं वनं यान्तं दृष्ट्वा स्वगृहमागताः ।

सूर्य्यादिपूजाव्याजेन कुसुमाहृतये तथा ॥
वञ्चयित्वा गुरून्याति प्रियसंगेच्छया वनं ।
इत्थं तौ बहुयत्नेन मिलित्वा स्वगणैस्ततः ॥
विहारै र्विविधैस्तत्र वन विक्रीडते मुदा ॥

तत्रैवाग्रे—सा तु सूर्य्यगृहं गच्छेत्सखीमंडलसंयुता ।
कियद्दूरं ततो गत्वा परावृत्य हरिः पुनः ।
विप्रवेशं समास्थाय याति सूर्य्यगृहं प्रति ।
सूर्य्यं प्रपूजयेत्तत्र प्रार्थितस्तत्सखीजनैः ॥

प्राक्--पुनश्च सारिकावाक्यैः स्वतल्पादुदतिष्ठतां ।
गच्छतः स्वस्वभवनं भीत्युत्कण्ठाकुलौ ततः ॥
आत्मनः सदृशाकारं राधामन्यां ससर्ज सा ।
या सा तु कृत्रिमा राधा वृषभानुगृहे सदा ॥
अयोनिसम्भवा या तु पद्मिनी सा परात्परा ।
कृत्रिमा या महेशानि तस्यास्तु चरितं शृणु ॥
वृषभानुर्महात्मा स तस्या वैवाहिकी क्रियां ।
कारयामास यत्नेन पञ्चवर्षे तु सुन्दरि !
तस्यास्तु चोभयं वंशं सावधाना बधारय ।
श्वसुरस्य वृकस्यापि वंशं परमसुन्दरं ॥
श्वश्रूस्तु जटिलाख्याता पतिम्मन्योऽभिमन्युकः ।
ननान्दा कुटिलानाम्नी देवरो दुर्म्मदाभिधः ॥

—वासुदेवरहस्ये राधातन्त्रेऽष्टमपटले

लोपिता कुलमर्य्यादा रासकेलिपराक्रमा ।
स्वकामा तु महातेजा ब्रह्मरूपधरा वरा ॥
ऊर्ज्जिता वेदमर्य्यादा निर्मला तनुगर्व्विता ।
आभीरनागरी कन्या कामिनी कृष्णयोषिता ॥

—धृतनिम्बार्कीयस्तोत्ररत्नहारे-गौतमतन्त्रे
कृष्णप्रोक्तराधिकास्तवराजे ॥

ततो मया ताः सर्वा निभाल्य राधा कथं न दृश्यते इत्युक्ते तुंगविद्ययोक्तं-गोकुलयुवराज ! सा खलु सप्रणयं आर्यया जटिलया कस्यचिद् गृहकार्यविशेषस्य कृते रक्षिता गृहे विद्यते ।

—विरक्तचूडामणिजीदासगोस्वामीपादेन मुक्ताचरिते ।

कलशनवनीतचोरे कमलादृक्कुमुदचन्द्रिकापूरे ।
विहरतु नन्दकुमारे चेतो मम गोपसुन्दरीजारे ॥

—कर्णामृते-( २।७१ ) ।

बालोऽपि शैलोद्धरणाग्रपाणि
र्नीलोऽपि नीरन्ध्रतमः प्रदीपः
धीरोऽपि राधानयनावबद्धो
जारोऽपि संसारहरः कुतस्त्वम् ॥ कर्णामृते २।७३

संकेतीकृतकोकिलादिनिनदं कंसद्विषः कुर्व्वतो
द्वारोन्मोचनलोलशंखवलयक्वाणं मुहुः शृण्वतः
केयं केयमिति प्रगल्भजरतीवाक्येन दूनात्मनो
राधा प्रागंणकोणकोलिविटपिक्रोडे गता शर्व्वरी ॥

—पद्यावल्यां धृतउपपति-उदाहरणे उज्ज्वलनीलमणौ

न राधा भर्त्तारं क्वचिदपि च दृग्भिर्गृहगतं
समद्राक्षीन्नित्यं तव सरसमूर्त्तिं विलिखति ।
तवाप्येतद्वक्षो वहति रुचिरां तत्प्रतिकृतिं
ततः कृष्ण प्रेम्णाहमपि विदधे दौत्यमखिलं ॥

अथालम्बनसंग्रहः

शान्ते ब्राह्मण एव स्यात्प्रीते दासः प्रकीर्त्तितः ।
प्रेयसि स्युः सखायो हि यशोदा वत्सले स्मृता ॥
मधुरे राधिका ज्ञेया हास्ये स्यान्मधुमगंलः ।
सखीयूथोऽद्भुते ज्ञेयो वीरे चारणगोवृषाः ॥

करुणे बत्सबृन्दादिः जटिलाद्यास्तु रौद्रके ।
गोबर्द्धनोऽभिमन्युश्च भयानक उदीरितौ ॥
तपस्विन्यादयो ह्यत्र वीभत्से परिकीर्त्तिताः ।
व्रजस्था नियता ज्ञेया आलम्बनबिभावकाः ॥

धृतोज्बलनीलमणिटीकायां नारायणभट्टपादबिरचितायां
—भक्तिरसतरङ्गिण्याम् ॥

शुनह नागर कान । राजकुमारि राधिका नाम ॥
जटिलाबधू नवीन बालि । अपन सो भावे कर खेयालि ॥
रस न परशे ताकर अङ्ग । कै सने होयब तोहर रङ्ग ॥
भने बिद्यापति न शुने नीत । ता बिनु कानू की धरब चीत ॥
—विद्यापतिजी

जागल शाश चलत तब कान ।
ना पूरल आश बिद्यापति भान ॥ विद्यापतिजी
शाशु घुमा ओत कोरे आगोरि ॥ इति पद्ये—
जटिला शाश, फुकरि तहिं बोलत बहुरि वेरि काहे थाड़ि
ललिता कहत अमङ्गल शुनल ॥

—बिद्यापति जी ॥

जटिला जाइया आनिल धरिया आपन बधूर हाते ।
बसिला हरषे देयाशिनी पाशे घुचाये वसन माथे ॥
आनंदे देयाशिनि बले शुभवाणी सब सुलक्षणयुता ।
गन्धर्व पावनी जगत तारिणी राधा नाम भानुसुता ॥
—चंडीदास जी

गुरु गुरुजन दूरे तेयागिनु पति क्षुर धार ताय ।
कानुर पिरीति किरीति करिनु कलंक ए लोके गाय ॥
—ज्ञानदास जी

गृहे गुरुजन स्वामि तरजन जा लागि ना दिनु काणे ।

एखन की लागि से जन आमारे ना चाहे नयन कोणे ॥

—ज्ञानदास जी

कह लहुलहु जटिलार बहू तोमारे सभाइ जाने ।
कहिते कहिते अनेक कहिछ एतना गरब केने ॥

—ज्ञानदास जी

एइ मने बले दानी हैयाछ कान्हाई छुइते राधार अङ्ग ।
राखाल हइया राजकुमारी सने ना जानि किसेर रङ्ग ॥

—ज्ञानदास जी

घर हेन नहे मोर घरेर बसति । बिष हेन लागे मोर पतिर पिरीति
बिरले ननदी मोर यतेक बुझाय । कानुर पिरीति बिनु आन नाहि
भाय ॥

—ज्ञानदास जी

निज पतिर बचन येन शेलेर घा ।
तार आगे दांडाइते भये कांपे गा ॥
ताहे आर ननदिनी करे अपमान ।
तोहे छार पिरीति लागि राखियाछि प्राण ॥

—बलरामदास जी

एक दिन आयान आइल घरे ।
कालिया देखिनु तारे, बन्धु बलि ताहारे सम्भाषि ॥
आमार आरति देखिया आयान मुखे कापड़ दिया हांसि
बन्धुयार भरमे आयानेर सने मनेर कथाटी कइ ॥ इत्यादि

—ज्ञानदास जी

तुरित हिं करह पयान ।
राई जागाइ लेह निज मन्दिरे निकटहि होयत बिहान ।
शारी शुक पिक सकल पक्षिगण तुहुँ सब देह जगाई ।
जटिला गमन सब हुं मेलि भागई शुनइते जागत राई ॥

निशि अबशेषे जागि सब सखी गण

—पद में गोविन्ददास जी

अतद्व्रता परगामिनि परकीयेति मता च ॥

बसुरी सुनि देखन दौरि चली जमुना जल के मिस वेगा तबै
कबि देव सखी के संकोचन सों करि उठ सु औसर को वितवै
वृषभानुकुमारी मुरारी की ओर विलोचन कोरनि सों चितवै
चलिबेको घरै न करै मन नैकु घडै फिर फेरि भरे रितवै ॥

—देवकविः परकीया प्रौढ़ा विदग्धा उदाहरणं

सासु ननद घर त्रास देखावै ।
तुम कुलबधू लाज नहिं आवति वारबार यह कहि समुझावे
कबहो गई न्यान तुम यमुना यह कहि कहि रिस पावै ।
राधा को तुम संग करति हो ब्रज उपहास उड़ावे ॥
वे हैं बड़े महर की बेटी तौ एसी कहवावै ।
सूनहु सूर यह उनकि फावै ऐसी कहति डरावै ॥

—सूरदास जी

मेरो मन गोपाल हरयोरी ।
चितबत हि उर पैठि नैन मन ना जानों धौं कहा करयोरी ॥
माता पिता पति वन्धु सजन जन सखि आंगन सब भवन भरयोरी
लोकवेद प्रतिहार पहरुआ तिनहूँ पै राख्यो न परयोरी ॥
धर्म धीर कुलकानि कुंचोकर तेहि तारौ दे दूरि धरयोरी
पलक कपाट कठिन उर अन्तर इते हु जतन कछु वै न सरयोरी ॥
बुधि विवेक बल सहित सच्यो पचि सुधन अटल कवहूँ न टरयोरी
लियो चुराइ चितै चित सजनी सूरसो मो तन जात जरयोरी ॥

—सूरदास जी

श्याम यह तुम सों क्यौ न कहौं ।
जहा तहां घर घर को घेरा कौन भाँति सहौं ॥

पिता कोपि करवाल लेत कर बंधु वधन को धावै।
माता कहै कन्या कुल को दुःख जनि कोऊ जग जावै॥
—सूरदास जी

जाति महति पति जाइ न मेरी अरु परलोक नशाईरी।
गिरिधर बर नैक न छाँडौ मिलि निशान बजाईरी॥
वहुरि कबहि यह तनु धरि पै हों कहा पुनि श्रीबनवारी री
सूरदास स्वामी के उपर यह तन डारौ वारी री॥
नन्दलाल सों मेरो मन मान्यो कहा करेगो कोई री। इस
—पद में

एक राधा दुसरी व्याही जानि जिय नागरी पाश आवत लजाही
नैन टहराई टहराइ पुनि पुनि रहै कहै नहि कछु हरषत डराही॥
नागरी चरित पिय चकित भारी—पद में-सूरदास जी।
गइ ज्ञाति अभिमान मोह मद पति परजन पहिचानि।
सूर सिन्धु सरिता मिलि जैसे मनसा बुंद हिरानि॥
विकानी हरि मुख को मुसकानि-पद में-सूरदास जी।

यां को घूंघट पट न उघारौ।
परत्रिय देखि अनिति करौ तुम नइ नइ रिति निकारौ॥
बड़े महरि की पुत्र वधू है नैक तो बात विचारौ।
भले बुरे की लाज न तुमको मन भावति करि पारो॥
दधि गोरस पैदा न लागवत मानो राज तिहारौ।
नारायण हैं कोन हमारे मग को रोकन हारौ॥
—नारायणस्वामी जी

सखी मोहि योंही करों वदनाम।
में घर सों बाहर नहिं निकसी नैनन देखे स्याम॥
पीठी पिछार करौ तुम चरचा लै लै मेरौ नाम।
श्री जी बचन सखी प्रति नारायण स्वामी॥

मोहन बसि गयो मेरे मन में ।
लोक लाज कुल कान छूट गई या की लगन लगन में ।।
श्री जी बचन सखी प्रति नारायण स्वामी ।।

जमुना तीर कान्ह डोलै है ।
भेद भरी बाँसुरी पै मोहि बोले है ।।
सासु डरन माँस भरों छतियाँ छोलै है ।
प्रान प्यासे आनन्द घन हिं मिलवै को लै है ।। पद ७५

विरही कृष्ण–
राधा राधा दीसै स्यामैं घर राधा बन राधा ।
चायनि भरि गाय नि लै निकसत दुरि मिलबे की साधा
ब्रज बसि कैसें बनत कुलीननि लोकलाज गुरुजनकी बाधा
आनन्दघन चातकलौं जीवन रसबस प्रान समाधा ।।पद १०२
प्रेम परावधि ब्रजबधू सुनि बंसी धुन मन्द ।
तजत भई सब सकुच तब भजत भईं ब्रजचंद ।।
आरज पथ भूली भले बिवस परी हित फंद ।
ब्रज मोहन मन मोहिनो, पूरन प्रेम अमन्द ।।

पद ६८
–कृपाकंद निबंध

मेरी ननंदी री कहि कहा करौं ।
तेरे बीरन परदेस विरमि रहे फागुन के दिन कैसे भरौं ।।
इत ब्रजमोहन होरी गावै मुरली धुनि सुनि सिथिल परौं ।
आनंद घन मोही पै घमड्यौ रीझि लाज सौं कौ लौं अरौं ।।
पद ४७६

दुरजन बाहिर गुरुजन घर मैं ।
लाल गरचारैं बोल सुआयो प्रान परे अरबर में ।।
पद १६८

गुरुजन गञ्जन बोल। गृहपति गरजन घोर ॥
गणाई ते गोप किशोरी। गहन गेञ्रो गृह छोड़ि ॥
गोविन्द गुणवती सोई। गुनि गुनि यामिनि रोई ॥

—गोविन्ददासजी

विषेर अधिक विष पाप ननदिनी
दारुण शाशुड़ी मोर ज्वलन्त आगुनि ॥
शाणान छुरेर धार स्वामी दुरजन।
पाँजरे पाँजरे कुलवधूर गंजन ॥
वंधु तोमार कि वलिब आन।
जे बलु से वलु लोके तुमि से पराण ॥

—बलरामदासजी

जटिला शुनिया आनाये डाकिया यतन करिया कैल।
बधूरे साजाञा गावी घृत लैया तुरिते ताहां इ चल ॥
ए सव वचने सव सखीगणे राइ र आनन्द होय।
से हेन नागर गुणेर सागर दरश हइबे मोय ॥

—यदुनन्दनदासजी

रायान चतुर वड सदा माथा ठाड।
मायेर सने आइला वने करिते कथा दढ़ ॥
हरिष विषाद मने भाल मन्द गुणे।
राईर रीति वुझिते तथि वसिला मण्डप कोणे ॥
शाशुडी आड जानि भये भीत भेल धनी ॥

सूर्य्य पूजा में—कविशेखरजी

घरही घर घेरुकरै घरि हाई नै नांव धरें सब गांवरी री
तव ढ़ोल दै दै बदनाम कियौ अव कोन की लाज लजांवरी री
कवि ठाकुर नैनसो नैन लगै अब प्रेम सों क्यों न अघांवरी री
अब होन दै बांस विसैरी हँसी हिरदै वसी मूरति सांवरी री ॥

—कविठाकुरजी

एक दिना मुरली धुनि में रसखानि लियो उन नाम हमारौं
ता दिन ते यह वैरिनि सासु सुभाव न देत नहीं निज द्वारौं
होत चवाव बलाय सों आलि हि जो मिलि भेटिये नंददुलारौं
डीठ परे हि लगो चटकौ खटकौ हियरे पियरे पटवारौं-रसखानि

शुश्रूषन्त्यः पतिन्काश्चिदश्नन्त्योऽपास्य भोजनं ।
ता वार्य्यमाणाः पतिभिः पितृभि र्भ्रातृबन्धुभिः ॥
गोविन्दापहृतात्मानो न न्यवर्त्तन्त मोहिताः ।
अन्तर्गृहगताः काश्चिद्गोप्योऽलब्धविनिर्गमाः ।
कृष्णं तद्भावनायुक्ता दध्यु र्मीलितलोचनाः ।
"तमेव परमात्मानं जारबुद्ध्यापि संगताः ॥
जहुर्गुणमयं देहं सद्यः प्रक्षीणबन्धनाः ।"
"मातरः पितरः पुत्रा भ्रातरः पतयश्च वः ।
विचिन्वन्ति ह्यपश्यन्तो मा कृढ्वं बन्धुसाध्वसं ।"
"भर्त्तुः शुश्रुषणं स्त्रीणां परो धर्म्मो ह्यमायया ।।"
"दुःशीलो दुर्भगो बृद्धो जड़ो रोग्यधनोऽपि वा ।
पतिः स्त्रीभि र्न हातव्यो लोकेप्सुभिरपातकी ॥
अस्वर्ग्यमयशस्यं च फल्गु कृच्छ्रं भयावहं ।
जुगुप्सितं च सर्व्वत्र औपपत्यं कुलस्त्रियाः ।।"
"स कथं धर्म्मसेतूनां वक्ता कर्त्ताभिरक्षिता
प्रतीपमाचरद्ब्रह्मन्परदाराभिमर्षणम् ॥
आप्तकामो यदुपतिः कृतवान्वै जुगुप्सितं ।
किमभिप्रायं एतं नः संशयं छिन्धि सुव्रत ॥

—दशमे—रासपंचाध्यायेषु

रागोल्लासविलंघितार्य्यपदवीविश्रान्तयोऽप्युद्धुर
श्रद्धारज्यदरुन्धतीमुखसतीबृन्देन वन्द्ये हि ताः

आरण्या अपि माधुरी परिमलव्याक्षिप्तलक्ष्मीश्रियः
स्तास्त्रैलोक्यविलक्षणा ददतु वः कृष्णस्य सख्यः सुखं ॥
—उज्वलनीलमणौ परकीयायाः।

कात्यायनीकुसुमकामनया किमर्थं
कान्तारकुक्षिकुहरं कुतुकाद्गतासि।
सद्यस्तनं स्तनयुगे तव कण्टकांकं
पत्युः स्वसा सखि सशंकमुदीक्षतेऽसौ ॥ तत्रैव परोढ़ायाः।
विस्रब्धा सखि धूलिकेलिषु पटासंवीतवक्षः स्थला
बालासीति न वल्लवस्तव पिता जामातरं मृग्यति
त्वंतु भ्रान्तविलोचनान्तमचिरादाकर्ण्य वृन्दावने
कूजन्तीं शिखिपिच्छमौलिमुरलीं सोत्कम्पमाघूर्णसि ॥
—उज्वलनीलमणौ कन्यायाः

" मत्कामा रमणं जारमस्वरूपविदोऽवलाः " इति
—एकादशस्कन्धे

" गोपनारीभिरनिशं यत्र क्रीडति कंसहा " --पद्मपुराणे
"गो-गोप-गोपवनितानिकरैः परितम्"--क्रमदीपिकायाम्।
" अत्र या गोपपत्न्यश्च निवसन्ति ममालये "
—बृहद्गौतमीयतन्त्रे

"विचित्राम्वरभूषाभिर्गोपनारीभिरावृतम् "
--श्रीगोपालस्तवे

"तदिदं मयोक्तमौपपत्येन रासक्रीडादिसुखमेवेत्यर्थः। विवाहेन पतित्वे रासक्रीडादिसुखविशेषो न संपद्यत इति भावः। सतीः हे सत्य इति औपपत्येऽपि यूयं सर्वथा साध्व्य एव, मदेकमात्रनिष्ठत्वादिति भावः। तत्त्वतोऽनौपपत्यात्। विवाहिताभ्योऽप्यधिकप्रियत्वात्। -श्रीभाग० १०।२२।२६-२७

बृहद्वैष्णवतोषण्यां श्रीसनातनगोस्वामिचरणैरुक्तम्

अथ व्रजे प्रकटायाञ्च श्रीकृष्णस्यौपपत्यं नित्यम्। श्रीराधिकादीनाञ्च परकीयात्वं नित्यम्। तयोः स्वरूपेण द्वैविध्यं नास्ति। किन्तु अप्राकृतद्वापरे प्राकृतद्वापरस्य मिलने स्वयंरूपे श्रीनन्दनन्दने वसुदेवनन्दनादिषु प्रकाशेषु मिलितेषु सत्सु लीलायाः प्राकट्यं भवति। —श्रीजीवगोस्वामीपादाः

"औपपत्यस्याप्राकृततत्वेन नित्यत्वात् प्रकटितौपपत्ये"

—धृतसाधनदीपिकायां

मो विषये गोपीगणेर उपपति भावे।
योगमाया करिबेक आपन प्रभावे॥
आमिह ना जानि आर ना जाने गोपीगण।
योगमाया करिबेक सकलि घटन॥

—श्री चैतन्यचरितामृते

अनेन श्रीकृष्णस्यौपपत्ये श्रीराधिकादीनां परकीयात्वे प्राकृतदृष्ट्या दोषदृष्टिं कुर्वन्तो जना मायावादिन इव कामानुगाभक्तिनिरतजनैः सर्वथा त्याज्याः॥

—साधनदीपिकायाम्

"कवे वृषभानुपुरे आहीरी गोपेर घरे"।
तनया हईया जनमिब।
यावटे आमार कवे। ए पाणि ग्रहण हवे।
बसति करिब कवे ताय॥

—प्रार्थनायां श्रीनरोत्तमठाकुरमहाशयाः

संग्रहिता—
प्रकाशकः